


## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | स्वास्थ्यदृष्ट्या योगस्योपयोगिता | डॉ. राजेश बतरा | ६ |
| ५ | निश्चिता क्रियते तिथिः | डॉ. प्रशस्यमित्र शास्त्री | ९ |
| ६ | समासशक्तिविषये विविधशास्त्ररीत्या विचारः | डा. सुरेन्द्रकुमारशर्मा | १० |
| ७ | आचारविमर्शविषयकमानवाधिकाराः | रमेशचन्दबुनकरः | १२ |
| ८ | जातकग्रन्थोक्तेषु स्त्रीजातकयोगेषु ....... | वन्दना शर्मा | १६ |
| ९ | पुत्रिकासमीक्षा | देवर्षिकलानाथशास्त्री | १८ |
| १० | संस्कृतसमाचाराः | देवर्षिकलानाथशास्त्री | १९ |
| ११ | सप्तदशः प्रसङ्गः-बालसखित्वं शीलम्। | वेणीमाधव गो. धर्माधिकारी | २० |
| १२ | सप्तत्रिंशःप्रसङ्गः-विश्वासःफलदायकः | श्रीमती आराधना धर्माधिकारी | २१ |
| १३ | आधुनिकं महर्षिदधीचिस्तोत्रम् | बद्रीप्रसाददाधीच : | २१ |
| १४ | भुवमागता भागीरथी | अभिराज राजेन्द्रमिश्रः | २२ |
| १५ | भारतीमञ्जुनिकुञ्जम् | डॉ. रामनारायण झा | २३ |
| १६ | शकुन-विमर्शः | देवकीनन्दनशर्मा | २४ |
| १७ | बालकाव्यम् | ऋषिराजजानी | २६ |
| १८ | बालगीतम् | परमानन्दशर्मा 'प्रमोद' | २६ |
| १९ | मम कुटुम्बनियोजनं करोतु.. ( स्मृतिकथा ) | डॉ. हर्षदेवमाधवः | २७ |
| २० | वृद्धा जनाः शिक्षकाः | आचार्य डॉ. राजेशकुमारगुप्तः | २८ |
| २१ | राज्ये महिला मण्डिता | डॉ. राजेश्वरी भट्टः | २९ |
| २२ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३१ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**




।। श्रीशः ।।

ISSN2249-689X

# भारती

संस्कृत-मासपत्रिका





**प्रमुखसंरक्षकाः**
जगद्गुरवो निम्बार्कपीठाचार्याः श्रीराधासर्वेश्वरशरणदेवाचार्याः,

**प्रमुखसंरक्षकाः**
जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकाः
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी
डॉ. शिवचरणशर्मा

आर्थिकपरामर्शदाता
ओ.पी. गोयल

पृष्ठसंयोजनम् :
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

प्रामुं या जगतः पतिं पतितया घोरं तपोऽप्यातपत्।
ईशानोऽपि तदा तदीयतपसः कर्तुं परीक्षां गतः।।
धृत्वा रूपमतीव योऽतिरुचिरं प्राचीकटत् सम्मुखे।
इत्थं प्रीतिमुपागते शिवशिवे वन्दामहे सादरम्।।

## मासावतरणम्

पुष्पामोदमहोत्सवः सुविदितश्चैत्रे समायोज्यते।
उद्यानेषु च पल्लवैः सकुसुमैः नृत्यन्ति सर्वा लताः।।
नानापुष्पसुगन्धिभिः प्रमुदिता नृत्यन्ति वै पादपाः।
भृङ्गाः पुष्परसं पिबन्ति मधुरं गुञ्जन्ति चैत्रे मुदा।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

चैत्रमासः
वर्षम् 67
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2073
अप्रेल, 2016
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

अङ्कः - 6

( राजस्थानसंस्कृत-अकादम्या आर्थिकसहयोगेन प्रकाशिता )

**सम्पादकीयम्**

# युवावस्थाः आधुनिकं परिदृश्यम्

**...✍ पं. प्यारेमोहनशर्मा**

सम्प्रति भारते शिक्षा व्यवसायप्रधाना सञ्जाता युवानः कथयन्ति वयमधुनास्माकं भाविजीवनं रचयामः। केरियरनिर्माणव्याजेन पारिवारिकपरम्पराः परित्यजन्ति। शनैः शनैः एतेन तलाक-(विवाहविच्छेद) प्रथा अवर्धत, समाजः परोक्षरूपेण बहुविवाहमार्गे अग्रेसरो जायते। अद्य येन रोगेण विकसिताः पाश्चात्य-देशाः त्रस्ताः सन्ति वयमपि तस्यामेव जीवनपद्धतौ आत्मनो विकासं पश्यामः। परम्पराः क्षीयन्ते मर्यादाः भज्ज्यन्ते। स्वतन्त्रता स्वच्छन्दतायां परावर्तते। एतद्विपरीतं सुरक्षायै सम्मानाय च तन्त्रस्यावश्यकता विद्यते। शिक्षिता अतिशिक्षिताः स्वेच्छया जीवनमभिलषन्ति। शिक्षायां क्षमतां विहाय ततोऽधिकं प्राप्तुमिच्छन्ति परिणामतो निराशः स्वात्मानं हन्ति। श्रेष्ठां भृत्यतामभिलषन्ति। अधिकवेतनात्मिकां भृत्यतां लब्ध्वा युवकः सर्वान् विस्मरति। गृहं प्रतिवेशिनं परिवारं जातिं समाजञ्च विस्मृति-कूपे पातयति। अनुभवशून्यं जीवनं जीवति। विवाहात् पूर्वमेकाकी अवर्तत विवाहानन्तरमपि अन्तःहृदि एकाकी एव जीवति। न स स्पप्नं पश्यति। केवलं भाविजीवनं सुखमयं (केरियर) भवेदिति चिन्तयति। विवाहानन्तरं गृहं परित्यजति। पारिवारिकसंस्कारमिमं पालयितुं वार्तामपि न चिन्तयति। गृहाद् बहिरेव स्वसम्बन्धान् विस्तारयति। सङ्गतानुरूपाः संस्काराःजायन्ते। पितरावपि पुत्रं न चिन्तयतः।

शक्तिस्वरूपा भवति स्त्री। बाल्यादेव तस्याः मातृत्वं प्रकटितं जायते। सा बाल्ये एव लघुभ्रातॄन् भगिनीश्च पालयति। तेषु स्निह्यति। क्रोडे उत्त्थाय चुम्बति। अभावग्रस्तपरिवारेऽपि सा तुष्यति। जीवनविषयेऽपि व्यावहारिकं ज्ञानं तस्यामधिकं भवति। सा मितं भाषते। एकाधिकानि कार्याणि सदैव सम्पादयति। मातॄणां पितॄणां परिजनानाञ्च जीवनस्याध्ययनं विदधाति। अनेनैवाधारेण भाविजीवनस्य स्वप्नान् रचयति। सम्प्रति पितरौ बालकेभ्यः संस्कारान् न यच्छतः। शिक्षकाः, परायत्ताः सञ्जाताः। धर्मनाम्ना सम्प्रदायव्यापारो वर्धते। कृष्णं धनमग्नौ घृतकार्यं करोति। इदमेव धनं धनाढ्यानां संततिं भोगिनीं विदधाति। यत्र शरीरं मस्तिष्कं गृहाङ्गणञ्च शून्यातां यान्ति तत्र संस्काराः कुतः आयान्ति? दूरदर्शनम्, इण्टरनेटादिकं तु दिशामेव परावर्तन्ते। मादकपदार्थानां जालं विस्तारमेति। अस्मिन्नेव वर्गे बालिकाबालकयोः भेदः समाप्तिंगतः। उभयोः दिनचर्या समानैव संजाता। पितरावपि समानतामिमामुपलब्धिरूपे स्वीकुर्वन्ति पश्यन्ति च।

भाविजीवननिर्माणेच्छा विवाहस्यायुरग्रे संस्थापयति। अर्थात् त्रिंशद्वर्षात्मकमायुः विवाहयोग्यम्। केचन-अध्ययननाम्ना केचन श्रेष्ठभृत्यस्य (नौकरी) नाम्ना समये विवाहं न स्वीकुर्वन्ति। प्राकृतिकी शारीरिकी ऊर्जातु समये समायाति परन्तु संस्कारशून्याः बालकाः नैनामूर्जां सोढुं सक्षमः भवन्ति। अतः केनापि विरोधिलिङ्गेन सह युग्मतां स्थापयन्ति। विवाहं कुर्वन्तु न वा कुर्वन्तु मनस्तु खण्डितं जायते एव। अग्रे गत्वा इदमेव जीवनस्तम्भं खण्डयति। यस्मिन् दिने सत्यमिदमनुभूयते तस्मिन् दिने जीवनं मौनमालम्बते । सङ्गतिरपि न तिष्ठति। शरीरं न चिरं लम्बते। मनसि न भवति काचन समानता।

शिक्षासमानतास्वतन्त्रताप्रभृतीनामधिकाराः समाजस्य विकासाय निरधार्यन्त। परन्तु व्यवहारे सर्वेषां स्वरूपमेव परिवर्तितं सञ्जातम्। एतेषां व्याख्या शास्त्रमर्यादातो बाहिरागत्य सत्तापक्षानुरूपा धनाढ्य-समाजरक्षापरा सञ्जाता। स्त्रियः सम्प्रति सामन्तीयुगीना मुद्रारूपे परिलक्षिता जायन्ते। उत्कोचे सर्वे ''अस्मतं'' भोगं याचन्ते। कथमेतज्जातम्? छात्रावासछात्राः सप्ताहान्ते धनार्जनाय यत्र कुत्रापि यान्ति। तदा कथमपेक्षामहे यदेताः परिवारं चालयिष्यन्ति सुसंस्काराँश्च दास्यन्ति? सर्वस्यैतस्य मूले शिक्षा भाविविलासयुक्तं जीवनं समानताया भावश्च वर्तते। पितरौ वदतः पुत्रीभ्यः शिक्षा परमावश्यकी विद्यते। ते कथयन्ति यदेताः समायाते समये आत्मनिर्भरा भवितुं शक्नुवन्ति। उच्चशिक्षाया मूले एषैव भावना। अत एव शीघ्रं समागतेऽपि विवाहयोग्ये आयुषि विवाहो नैव सम्पाद्यते। अध्ययनेन सहैव भृत्यतां प्रविशन्ति। विवाहः पुनरग्रेसरति। प्रकृत्यैव बालिकाः बालकापेक्षया सुमतयो जायन्ते। सत्यं तावदिदमेव यद् बालिकाः साक्षात् प्रकृतिस्वरूपा मायारूपाश्च विद्यन्ते। तासां जीवनदर्शन-मायुषा सह सुदृढं जायते। शिक्षादृढतामिमां युवकान् प्रति परावर्तत। समानतायाः अधिकारस्तु स्वच्छन्दताम-यच्छत्। ततश्च भाविजीवने मातृत्वज्ञानमेवालुप्यत। शरीरमेव सर्वस्वम्। अध्यात्मज्ञानमलुप्यत।

तासां दर्शनं सुदृढमजायत। अतस्तस्य परिवर्तनं दुष्करं जातम्। अल्पायुषि विनम्रभावोऽप्यलुप्यत। नवीनदर्शनाङ्गीकारक्षमता न तासु विद्यते। भृत्यताहंकारः सुदृढः संजातः। विवाहानन्तरमपि नवीनगृहपरम्परा-पालने ता अक्षमाः संजाताः किं तया विधेयमिति सा स्वयं न्यश्चिनोत्। अधुना पत्यै श्वसुरालयाय स्वगृहाय स्वप्रदर्शनं निरूद्धं सम्जातम्। स्वकीयमस्तित्वमपि सीमितं सञ्जातम्।

विवाहाय बालिकाः नवीनं गृहं यान्त्येव। यतोहि शारीरिकी आवश्यकता विद्यते। शारीरिकावश्यकतायाः तीव्रतामवलोक्य सहसैव विवाहाः सञ्जायन्ते। अत्र पित्रोः भूमिकाया नास्ति महत्वम्। बहुसंख्यका विवाहाः मातापित्रोः इच्छाविरूद्धा जायन्ते। समाजस्य नास्ति कोऽपि प्रभावो महत्वं वा। विवाहानन्तरमुभौ एव समाजमुक्तं स्वतन्त्रजीवनं जीवतः। तयोश्चर्या छात्रावाससदृशी जायते। उभावेव स्वकार्यानुरूपं गमनागमनसमयं स्वीकुरुतः। उभयोः अतिथयोऽपि भिन्नाः भवन्ति। किञ्चित् कालानन्तरमुभावेव स्वजीवने बाधामनुभवतः। शारीरिकी आवश्यकतापि तीव्रतां परित्यजति। उभयोः प्राथमिकता स्वतन्त्रा भवति। परस्परम् एको द्वितीयस्य जीवनविषये तु न तावविचारयताम्। एकत्वेन न द्वित्वेन जीवनमिच्छतः। पृथक् परिचयाय पार्थक्यमपि अङ्गीकुरुतः। प्रेमरसः मनसि न समुद्भवति। विवाहस्य कारणं तु शारीरिकी तात्कालिकी-तीव्रता एवाविद्यत सा च पूर्णतां गता। प्राचीनात् मनः उच्चाटितं जायते। यद्वस्त्रमद्य परिधापितं न तस्य श्वः परिधानेच्छा विद्यते।

अतः समये विवाहः श्रेयस्करो भवति न तेन केवलं शारीरिकी आवश्यकता पूर्यते अपितु मनांसि अपि मिलन्ति। परस्परं समर्पणभावः उदेति। न तत्राहंकारः समुदेति। पारिवारिकं प्रेम अपि वर्धते। गृहं प्रति उत्तरदायित्वबोधोऽपि सञ्जायते। बालकेषु स्नेहभावनाः संवर्धन्ते। वृद्धाः सम्मान्यन्ते। स्वर्गतुल्यं तद्गृहं सञ्जायते। कालिदासेनाप्युक्तम्-

**शुश्रूषष्व गुरुन् कुरु प्रियसखीवृतिं सपत्नीजने**
**भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।**
**भूयिष्ठं भव दक्षिणा परिजने, भाग्येष्वनुत्सेकिनी,**
**यान्त्येवं गृहणीपदं युवतयो वामाः कुलस्याधयः।**

# स्वास्थ्यदृष्ट्या योगस्योपयोगिता

...✍ डॉ. राजेश बतरा

यद्यपि योगः मुख्यतः आध्यात्मस्य विषयः अस्ति, तथापि आधुनिकसमये योग-विज्ञानं स्वास्थ्यविज्ञान-रूपेण विकसितम्। मनुष्यस्य शारीरिकं, मानसिकं, आध्यात्मिकं, बौद्धिकम् सामाजिकं सुखावहमिति अवस्था स्वास्थ्यं कथ्यते। आयुर्वेदस्य महता विदुषा महर्षिणा सुश्रुतेनोक्तं यत् सैव व्यक्तिः स्वस्था कथयितुं शक्यते यस्याः दोषाः, अग्निव्यापारः, धातवः तथा मलादयश्च समावस्थायां भवन्ति, तथा आध्यात्मिकऐन्द्रियक-मानसिकरूपेण च प्रसन्ना भवति। वस्तुतस्तु इयं पूर्णस्वास्थ्यस्यावधारणा वर्तते। अत एव योगस्याध्यात्मिकप्रयोगातिरिक्तं व्याधिनिवारकसाधनारूपेण अस्य प्रचलनमाधुनिके युगे वर्धत एव। यतो वैज्ञानिकयुगस्य दुष्परिणामस्वरूपं व्याधीनां प्रकोपः सर्वसाधारणेषु निरन्तरं वर्धते। अद्यापि योगमीश्वर-प्राप्तेः माध्यममिति मत्वा साधनरताः बहवः सन्ति तथापि साध्यासाध्यरोगाणां निवारणाय अन्यपद्धतीनां परिस्थितिविशेषात् विफलत्वेन तत्र योगः जीवनप्रद-चिकित्सारूपेण विद्यमानो भवति। योगः न केवलं स्वास्थ्योन्नायकः अस्ति अपितु समूलरोगनिवारक-चिकित्सीयविज्ञानरूपेण अस्य महत्ता स्पष्टमेव वर्तते।

सांख्यदर्शने सृष्टेः विकासे पञ्चविंशतितत्त्वानि स्वीकृतानि। योगदर्शनं खलु अस्यैव विकसितं दर्शनमस्ति। यस्मिन् पुरुषः, प्रकृतिः, महत्, अहंकारः, एकादशेन्द्रि-याणि, पञ्चतन्मात्राः पञ्चमहाभूतानि तथा ईश्वरः, इत्येवं षड्विंशतिपदार्थाः स्वीकृताः। एषु पञ्चमहाभूतानां शारीरिकस्वास्थ्येन सह प्रत्यक्षसम्बन्धो-ऽस्ति। पञ्चमहाभूतैः शरीरस्य निर्माणं जायते तथा एतेषामसन्तुलने जाते शरीरे वात-पित्त-कफानां कुप्रभावः जायते। 'यत् पिण्डे तत् ब्रह्माण्डे' इति अवधारणा अस्मिन्नेव आधारिता। ब्रह्माण्डस्य रचनायामपि एतेषां पञ्चमहाभूतानां भूमिका मुख्या वर्तते। अतः कियत्कालादेव खगोलविद्भिः तथा सृष्टितत्त्वज्ञैः सृष्टिविनाशप्रक्रियायाः प्रारम्भस्य भयस्योत्पत्तेः आशंकाः प्रतिपादिताः। यतो ब्रह्माण्डस्य पञ्चतत्त्वानां स्थितौ सामान्यासन्तुलनं जातम्। असन्तुलनं यदा शरीरे जायते तदा रोगाः उत्पद्यन्ते। अतः योगाभ्यासेन साधकः स्वशरीरस्थानां पञ्चैतेषां तत्त्वानां शुद्धिं विधाय न केवलं स्वास्थ्यं लभते अपितु जरामृत्योः भयात् निवर्तते। तद्यथोक्तं श्वेताश्वतरोपनिषदि-

**पञ्चात्मके योगगुणे प्रवृत्ते।।**
**न तस्य रोगो न जरा न मृत्युः।**
**प्राप्तस्य योगाग्निमयं शरीरम्।।**[1]

श्रीरामचरितमानसेऽपि उक्तम्-

**क्षिति जल पावक गगन समीरा।**
**पंचरचित अति अधम सरीरा।।**[2]

शारीरिकस्वास्थ्यदृष्ट्या पञ्चशुद्धिः हि योगाभ्यासस्य उद्देश्यमस्ति। सैव पञ्चशुद्धिः प्राकृतिकाहारेणापि जायते। श्रीमद्भगवद्गीतायामपि यथायोग्याहारविहारो दुःख-नाशक इत्युक्तम्-

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**
**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा।।**[3]

अतः योगाभ्यासकारिणा साधकेन जलाहार-रसाहार-फलाहार-अपक्वाहारैः स्वस्य पञ्चभौतिकशरीरस्य शुद्धिः करणीया। अत्रोल्लेखनीयमस्ति यत् रोगनिवारणाय उत्तमस्वास्थ्यलाभाय च प्राकृतिकचिकित्सामाध्यमेन अपि पञ्चशुद्धिः अत्यन्तमुपयोगिनी अस्ति। एतेषु मृत्तिका-चिकित्सा, जलचिकित्सा, सूर्यकिरणचिकित्सा, वायु-चिकित्सा, प्राणायामादिभिः पञ्चतत्त्वशुद्धेर्विधानं क्रियते। प्राकृतिकचिकित्सापद्धतौ मृत्तिकाजलसूर्यकिरणवायवः शतरोगाणां महौषधिः इति मतम्।

मनुष्यस्य शरीरं 72864 संख्यकैः नाडीभिः विनिर्मितमस्ति। एषु प्राणधारायाः स्रोतरूपेण इडा-पिङ्गला-सुषुम्ना इति नाडीत्रयाणां प्रमुखस्थानं वर्तते। एतेषां जागरणम् एव कुण्डलिनीशक्तेः जागरणं मन्यते। अत्र

ज्ञातव्यमस्ति यत् जीवनधारकशक्तिः विविधाभिः नाडीभिः शरीरस्य प्रत्येकेषु स्थानेषु प्रसरति एव। एताः नाड्यः षड्भिः मुख्यचक्रैः सम्बन्धिताः सत्यः कार्यरताः भवन्ति। एताभिः शरीरस्य निश्चितानि शारीरिक-मानसिक-स्वचालितकार्याणि सम्पद्यन्ते, ते यथा-

| **चक्रम्** | **स्थानम्** | **वृत्तिः** |
|---|---|---|
| 1. मूलाधारचक्रम् | जननाङ्ग-गुदयोर्मध्ये | सृजनात्मकेच्छा कामः आनन्दश्च। |
| 2. स्वाधिष्ठानचक्रम् | जननाङ्गस्य मूले मूलाधार-मणिपुरचक्रयोर्मध्ये | शङ्का, अविश्वासः, मिथ्याज्ञानम्। |
| 3. मणिपूरचक्रम् | नाभिः | आलस्यं, दुःखं मन्दता, अज्ञानता लज्जा, अस्थिरता, ईर्ष्या इत्यादयः। |
| 4. अनाहतचक्रम् | हृदयप्रदेशे | आशा, रक्षा, चिन्ता, हरणभावना, असदधिकारः, अहंकारः प्रयत्नं, पाखण्डः भेदभावः, अनिश्चयता, दुःखम्। |
| 5. विशुद्धिचक्रम् | ग्रीवामूलं | सप्तरागानामुत्पत्तिः विषयम् अमृतञ्च। |
| 6. आज्ञाचक्रम् | ललाटस्य भ्रुवोर्मध्ये | सत्त्वादिमानसिक-गुणत्रयम्। |

एतेषामुपरि नाडीषडात्मकं मानसचक्रमस्ति। तेन पञ्चज्ञानेन्द्रियाणि तथा स्वप्नकाले मिथ्याज्ञानावस्थायां मस्तिष्के जायमानाः संवदेनाः सूच्यन्ते। मानसचक्रस्योपरि सोमचक्रस्य स्थितिः। तदुपरि सहस्रारचक्रं वर्तते। आनन्दमयचक्रं ब्रह्मरन्ध्रः इत्यपरनाम्ना प्रसिद्धमस्ति। अस्मादेव चक्रात् ब्रह्मास्वादस्य अनुभूतिः जायते। अधः स्थितेषु चक्रेषु प्रवाहिता नकारात्मकशक्तिः (नकारात्मक-ऊर्जा) योगाभ्यासेन ऊर्ध्वचक्रेषु प्रवाहिता भूत्वा सकारात्मकशक्तिरूपेण परिवर्तते। अनेन इडा-पिङ्गला-सुषुम्नानां नाडीनां शोधनं जायते, तेन शरीरस्थाः सर्वरोगाः समूलं विनश्यन्ते। तेन च अनन्तशक्तयः जागृताः भवन्ति। अष्टाङ्गयोगातिरिक्तं द्वादशप्रकाराः मुद्राः दशमहामुद्राः तथा मूल-उड्डीयान-जालन्धरेति बन्धत्रयम्ः अपि योगभ्यास-दृष्ट्या महत्त्वपूर्णाः सन्ति। एतेषामभ्यासेन शारीरिकः मानसिकः, बौद्धिकः आत्मिकश्च विकासः जायते। मूलस्य बन्धने सर्वं निबद्धं भवति। अतः योगाभ्यासेन मूलाधारात् ऊर्ध्वस्थितानि चक्राणि एकैकेन सिद्ध्यन्ते शुद्ध्यन्ते वा। आयुर्वेदस्य पञ्चकर्म इव यौगिक-षट्कर्म अन्तःशोधनस्य महत्त्वपूर्णः विधिरस्ति। तैः नेति-धौती-बस्ति-त्राटक-कपालभाति-नौलिभिः सम्पूर्ण-शरीरस्य शुद्धिः क्रियते। तत्र कुञ्जलक्रिया शंखप्रक्षालनञ्च शुद्धिक्रिये स्तः। आधुनिक-समये सूक्ष्मक्रियाः, सूर्यनमस्काराः, यौगिकव्यायामः, आसनानि, प्राणायामः असनं तथा ध्यानस्य सरलविधयः एव योगाभ्यासस्य मुख्यसाधनानि मत्वा प्रचाल्यन्ते। साधकस्य आयुः, शरीरप्रकृतिः, रोगस्यावस्था, ऋतुः, देशः, कालः वातावरणम् इत्येषां दृष्ट्या कुशलयोगचिकित्सकस्य अथवा योगगुरोः संरक्षणे योगाभ्यासेन च शरीरं सुदृढं स्वस्थं च कर्त्तव्यम्। न केवलं शरीरमात्रेणापितु विचारैः, आचारैः, व्यवहारैः, मनसा, बुद्ध्या, आत्मना च योगं प्रति समर्पणभावः स्थापयितव्यः। गीतायामपि उक्तमस्ति-

**योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।**
**सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते।।**[4]

योगस्य प्रभावः शरीरे एतेषां बिन्दूनां माध्यमेन ज्ञातुं शक्यते-

1. सूक्ष्मक्रियाभिः, आसनैः शारीरिकयौगिकक्रियाभिश्च मांसमज्जास्थितान्त्राणि मस्तिष्कंच सुदृढं भवति।

2. आसनानां प्रभावो न केवलं बाह्यशरीरेऽपितु अन्तः-स्रावितन्त्रेषु मनःमस्तिष्कयोश्च भवति।

3. प्राणायामस्य प्रभावेण पञ्चमहाभूतानि समावस्थायां जायन्ते। पञ्चवायवश्च (प्राणापानोदानव्यान-समानानि) समत्वमाप्नुवन्ति, यैः शरीर-मनः-बुद्धि-रात्मनः च निर्मलाः भवन्ति।

4. प्राणायामस्याभ्यासः प्रकृतेरनुकूलेन, उचितप्रकारेण, निरन्तराभ्यासेन साध्यासाध्यरोगेभ्यो मुक्तिंप्रापयति।

अन्तःस्राविग्रन्थिषु चयापचययोरपि प्राणायामस्य प्रभावो नूनमेव जायते।

5. शवासनेन, योगनिद्रया ध्यानस्य सरलक्रियाभिश्च शारीरिकमानसिकरोगेभ्यो मुक्तिः सम्भवति।

6. षट्कर्म-कुञ्जल-शङ्खप्रक्षालनादिभिः शारीरिकान्त-रिकशुद्धतया शरीरं योगमयं सञ्जायते।

7. योगाभ्यासेन मनोविजयः, तनावशैथिल्यं, शारीरिक-व्यायामः, स्थूलसूक्ष्मशरीरयोः पुनःस्थापनं, संशोधनञ्च भवति।

8.योगाभ्यासेन सद्विचाराणामुद्रेको व्यक्तेश्च विकासः जायते।

योगस्याष्टाङ्गिकमार्गेण व्यक्तेः सर्वाङ्गीणविकासो जायते, तदेव सम्यग् योगोऽस्ति। सर्वसाधारणानां कृते नित्यमभ्यासाय योगस्य सरलतमो विधिरत्र प्रस्तूयते-

1. उद्गीथध्वनिः त्रिवारं, गायत्रीमन्त्रोच्चारणं त्रिवारं, प्रार्थना - 5 निमेषाः

2. सुखासने/वज्रासने/सिद्धासने/अर्द्ध उत वा पूर्णपद्मासने उपविश्य पञ्चयमानां नियमानां च विश्रान्तभावेन मननं, तान् प्रति सकारात्मकसङ्कल्पः तथा आत्मनिर्देशः - 5 निमेषाः।

3. दण्डायमानं भूत्वा उपविश्य वा केषाञ्चित् सरलासनानामभ्यासःसन्धिचालनं (Joint Rotation) सूक्ष्मक्रियाः, ग्रीवाक्रियाः, ताडासनं, त्रिकोणासनं, सूर्यनमस्कारादिक्रियाः शरीरसामर्थ्यानुसारम्-10 निमेषाः।

4. उदराश्रितासनम्-ताडासनं, भुजङ्गासनं, तिर्यक्-भुजङ्गासनं, शलभासनञ्च - 5 निमेषाः।

5. प्राणायामः (क) उच्छ्वासवर्द्धनं श्वासे ध्यानञ्च-4 निमेषाः। (ख) अनुलोमविलोमः (नाडीशोधनम्)-4 निमेषाः। (ग) भ्रामरी+ऊँकार-जपः-2 निमेषाः=10 निमेषाः

6. पृष्ठदेशबलेनासनम्-ताडासनं, पवनमुक्तासनं, अर्द्धहलासनं, पादोत्तानासनं, अर्द्धकटिचक्रासनं, मकरासनञ्च- 5 निमेषाः।

7. प्राणायामः-(द्वितीयचक्रम्) प्रथमस्य चक्रस्याखिलाः क्रियाः (क,ख,ग) 10 निमेषाः तथा तेषां पुनः अभ्यासः, तत्पश्चात् शवासनम्-3 निमेषाः।

8. प्रत्याहारः-ज्ञानमुद्रा, इन्द्रियनिग्रहः, सङ्कल्प आत्मनिर्देशश्च - 7 निमेषाः।

9. संयमः (धारणा-ध्यान-समाधयः) सहजध्यानम्-10 निमेषाः।

(शरीरप्रेक्षा, विचारप्रेक्षा, श्वासप्रेक्षा, चक्रध्यानञ्च)

**सम्पूर्णयोगः - 70 निमेषाः।**

अयं चैकहोरात्मकः सरलयोगाभ्यासविधिः सर्व-साधारणायावश्यकः तथा योगमयशरीरप्राप्तये विधिरयं परमावश्कः। सर्वेषु योगसम्प्रदायेषु परम्परासु च दैनिकचर्याया विशेषमहत्त्वं प्रदत्तम्। योगसाधकस्य दिनचर्या जनानां कृते आदर्शभूता स्यात्। तेन प्रतिदिनं कोऽपि सङ्कल्पः स्वीकर्त्तव्यः, आत्मनिरीक्षणाय प्रतिदिनम् आध्यात्मिकसञ्चिका पूरयितव्या। दैनिकचर्यायाः प्रारूपस्य प्रकार एक प्रस्तूयते-

**गृहस्थयोगसाधकाय दैनिकचर्या**

1. नित्यकर्म स्नानादिकम् - 1 होरा
2. योगाभ्यासः (आसनप्राणायामः) प्रातः - 1 होरा सायं/रात्रौ 1 होरा
3. भ्रमणं - 30 निमेषाः
4. स्वाध्यायः - 1 होरा
5. सत्सङ्गः/कीर्तनं/जपः/पूजा - 1 होरा
6. ध्यानं - 1-5 होरा
7. सेवा - 1 होरा
8. आहारः (भोजनं जलपानञ्च) - 1 होरा
9. विश्रामः (दिवसे) - 1 होरा
10. आजीविकासम्बन्धितकार्याणि - 8 होराः
11. सामाजिककार्यं/रचनात्मककार्यं/साक्षात्कारः - 1 होरा
12. निद्रा - 5 होराः

**योगः 24 होराः**

उपर्युक्ता दैनिककार्यक्रमस्य तालिका गृहस्थानां कृते अस्ति। परन्तु पूर्णकालिकसाधकैस्तु 4-5 होरापर्यन्तं

ध्यानाभ्यासः करणीयः। योग साधना ब्रह्मचर्य-गृहस्थ-सन्यासा-वस्थासु कर्तुं शक्यते तत्कृते न किमपि बाधकत्वं भजते। ध्यानात् क्लमे जाते जपं कुर्यात्, जपे मानसिक-चाञ्चल्ये जाते ध्यानं करणीयम्। स्वाध्यायस्य स्थाने कदाचित् लेखनकार्यमपि कर्तुं शक्यते। प्रारम्भिकदिवसेषु जपे स्थिरतायाः अभावात् मन्त्रलेखनेनापि जपः कर्तुं शक्यते।[5]

-निदेशकः वैलनेस केयर, योग-प्राकृतिक, चिकित्सा केन्द्रम्, संचालकोध्यक्षश्च, योगसंस्कृत्युथानपीठम्

अशोक विहारः, नवदेहली-110052

**सन्दर्भाः**

1. श्वेताश्वेतरोपनिषद् 1-12
2. श्रीरामचरितमानस, किष्किन्धाकाण्ड।
3. श्रीमद्भगवद्गीता, 6-17
4. श्रीमद्भगवद्गीता, 2/48
5. राजयोग-साधना और सिद्धान्त, डॉ. ब्रह्ममित्र अवस्थी 'प्रणव'

## निश्चिता क्रियते तिथिः

❑ डॉ. प्रशस्यमित्र शास्त्री

**एकदा देवदत्तस्य सुता प्रोवाच लज्जिता।**
**अहं 'तेन' समं तावद् विवाहं कामये पितः।।**
**देवदत्तस्तु तच्छ्रुत्वा मौनमाधाय चिन्तितः।**
**विचारयन् पुनः किञ्चित् सुतामेवं ब्रवीति यत्।।**
**अस्तु, 'तम्' आनयस्व त्वं गृहे शीघ्रं ततः परम्।**
**वार्ता 'तेन' समं कृत्वा निर्णयः प्रकरिष्यते।।**
**अथाऽग्रिमे दिने तावद् यदा 'स' आगतस्तदा।**
**पृष्टवान् देवदत्तो यद् त्वं भो ! किं कर्तुमिच्छसि।।**
**देवदत्तवचः श्रुत्वा तदा 'स' प्रब्रवीति यत्।**
**भवतः कन्यया सार्धं बहु प्रेम करोम्यहम्।।**
**विवाहं च चिकीर्षामि सद्य एव ततो भवान्।**
**कृपयाऽनुमतिं दत्त्वा करोतु मय्यनुग्रहम्।।**
**'तस्य' तद्वचनं श्रुत्वा देवदत्तस्तु पृष्टवान्।**
**साम्प्रतं त्वं करोषि किम्? इति ज्ञातुं हि कामये।।**
**देवदत्तस्य तत्प्रश्ने विनतः प्रत्युवाच 'सः'।**
**द्विमासपूर्वमेवाऽहं कारागारात् समागतः।।**
**कारागाराच्च मुक्तोऽहं साम्प्रतं काममपि भृतिम्।**
**कार्यं वा मार्गये नित्यं मन्ये शीघ्रम् अवाप्स्यते।।**
**तच्छ्रुत्वा देवदत्तस्तु विस्मितः, पुनराह यत्।**
**किम् उक्तं भो ! त्वया ? कारागारादसि समागतः?।।**
**कार्यं च कुरुषे नैव विवाहं चाऽपि वाञ्छसि?।**
**मदीय-कन्यया सार्धम्? दुःसाहसमिदं महत्।।**
**अस्तु, किं कारणं यत् त्वं कारागारे गतोऽभवः?।**
**तदहं ज्ञातुमिच्छामि कृपया वद चोत्तरम्।।**
**देवदत्तस्य प्रश्ने 'सः' कारणं प्रत्युवाच यत्।**
**एकस्य पुरुषस्याऽहं शिरसि रोषपूर्वकम्।।**
**प्रहारं कृतवान् येन सहसा स नरस्तदा।**
**मरणासन्न एवाऽभूत् आहतो व्रणितस्तथा।।**
**तस्मिन्नेवाऽभियोगे तु कारायाम्प्रापितस्त्वहम्।**
**द्विवर्षाऽनन्तरं मुक्तः साम्प्रतं समुपस्थितः।।**
**देवदत्तस्तु तद्वाचं श्रुत्वा 'तम्' पुनराह यत्।**
**कथं तत्र प्रहारस्य कारणं तव ? मां वद।।**
**देवदत्तवचः श्रुत्वा कठोरमुख-मण्डलः।**
**प्रहारस्य तु तत्राऽथ कारणं 'स' ब्रवीति यत्।।**
**पुरुषोऽसौ स्वकन्याया विवाहं तेन वै समम्।**
**निषिद्धवान् अतस्तेन प्रहारः शिरसि कृतः।।**
**तदुत्तरं समाकर्ण्य किं-कर्त्तव्य-विमूढ-धीः।**
**देवदत्तस्तदा तत्र दीर्घं निःश्वस्य प्राह यत्।।**
**त्वादृशो वीर-गंभीरः सुयोग्यश्च वरस्तथा।**
**दुर्लभो वर्त्तते तस्मात् शीघ्रमेव मया प्रिय!।।**
**आहूय पण्डितं शीघ्रं मुहूर्त्त-लग्न-संयुता।**
**विवाहस्य तिथिः काचित् निश्चिता प्रकरिष्यते।।**

**बी-29, आनन्दनगर,**
**रायबरेली**

# समासशक्तिविषये विविधशास्त्ररीत्या विचारः

❑ डा. सुरेन्द्रकुमारशर्मा

अत्र विचार्यते - समासे पदशक्त्यतिरिक्ता विशिष्टार्थ-बोधिका काचित् शक्तिरस्ति न वेति। तत्र तावन्नैयायिकमते पदमेव शक्तम्। अर्थविशेषनिरूपितशक्तिः पदे एव तिष्ठति न तु वाक्येऽपि। वाक्यञ्चानेक-पदघटितात्मकम्। तच्च समासे सिद्धमेवेति न वर्तते समासे काचिद् विशिष्टा शक्तिः किन्तु समासघटकानि प्रत्येकं पदानि सन्ति सार्थकानि स्वार्थबोधसमर्थानि। न च राजपुरुषः इति समासतो राजसम्बन्धवान् पुरुषः इति बोधस्य सर्वानुभवविरुद्धतया समासे शक्तिमन्तरा कथं जायेत तस्य प्रत्ययः? न च वर्ततेऽत्र सम्बन्धबोधिका विभक्तिरपि यया प्रत्याय्येत सम्बन्धः। तस्मादगत्या समुदायशक्तिरङ्गीकार्येति चेदत्र वदन्ति ते पदार्थद्वयसंसर्गस्याकांक्षाभास्यत्वमिति नियमाभ्युपगमात्। राजपुरुष इत्यत्र संबन्धस्याकांक्षाभास्यमेव भविष्यतीति न तदर्थं विशिष्टशक्तिकल्पनमावश्यकम्। तथा च स्वत्वसम्बन्धेन राजवान् पुरुषः इत्येव तत्र बोधः इति न काप्यनुपपत्तिः।

न च तेषां मते संसर्गस्य प्रकारत्वं तेषां मते कथं निस्तारः स्यात् विना विशिष्टशक्तिस्वीकारादिति चेत् तत्रापि राजपदस्य राजसम्बन्धिनि लक्षणया तेन सह पुरुषस्याभेदान्वये सम्पन्ने सर्वथैवानुपपत्तेरभावः।

एवं बहुव्रीहौ चित्रगुरित्यादौ गोपदस्य गोस्वामिनि लक्षणां कृत्वा गवि चित्रावभेदान्वयेन चित्राभिन्ना या गौः तस्याः स्वामीति बोधः सुकरः। न च गोस्वामिनि लक्षणया तदैकदेश गोपदार्थेन सह कथं चित्रान्वयः? एवं चेद्गोपदं गोस्वामिनि लाक्षणिकं चित्रपदञ्च तात्पर्यग्राहकमित्यभ्यु-पगमान्न दोषः। द्वन्द्वे तु प्रत्येकं पदार्थस्य स्वातन्त्र्येण भानं विभक्त्यर्थान्वयश्चानुभवसिद्ध एवेति नास्त्यावश्यकता तत्र लक्षणायाः। यत्र तु समानविभक्तिकपदानां कर्मधारयः क्रियते तत्र नीलोत्पलम् इत्यादौ संसर्गवादानुसारं जायते, अभेदसम्बन्धेन नीलविशिष्टमुत्पलमिति बोधः। अत्राभेदः आकांक्षाभास्यः प्रकारतावादानुसारन्तु नीलाभिन्नमुत्पल-मिति बोधस्तु कर्तुं न शक्यते अभेदोपस्थापिकायाः विभक्तेरभावात्। न च समासस्थले लुप्तविभक्तेरनुसन्धानमभितम्। तस्मादत्रापि नये नीलपदार्थः अभेदेनाकांक्षाभास्येनोत्पलपदार्थे विशेषणम्।

यत्र चासमस्तानि प्रयुज्यन्तेऽनेकानि पदानि तत्र तद्घटितवाक्ये शक्तेरभावान्न भवति लक्षणा कुत्रापि, किन्तु तत्र गभीरायां नद्यां घोषः इत्यादौ नीलपदं गभीरनदीतीरे लाक्षणिकं, गभीरपद च तत्रैवार्थे तात्पर्यग्राहकं भवति। एवं रीत्या सवत्रैव समासे विशिष्ट-शक्तिस्वीकारमन्तरापि कार्ये निर्वाहे किमर्थमङ्गीकार्या-तिरिक्ता शक्तिः? तस्मात् समासघटकादि प्रत्येकं पदानि सार्थकानि। अयमज-हत्स्वार्थवृत्तिपक्ष एव व्यपेक्षाशब्दे-नोच्यते। व्यपेक्षा च स्वार्थपर्यवसायिनां पदानामाकांक्षादिवशात् परस्परमन्वयः। एवञ्च नैयायिकमतानुसारं समासघटकपदानां सार्थक-त्वेनैवोपपत्ते समासे न काप्यतिरिक्ता शक्तिरिति सिद्धम्। न चैवं राजपुरुष इत्यत्र राजपदार्थस्य सार्थकतया तत्र वृत्यघटकपदार्थान्तरस्यान्वये 'ऋद्धस्य राजपुरुषः' इति प्रयोगापत्तिरिति वाच्यम्? सविशेषणानां वृत्तिर्न वृत्तस्य च विशेषणयोगो नेति सिद्धान्ते जागरूके तथा वक्तुमशक्यत्वात्। न चैवम् उपमितं व्याघ्रादिभिः सामान्यप्रयोगे इति सूत्रे सामान्यप्रयोगे इति विशेषणतया सामान्यप्राप्तेः सुतरां सिद्धत्वेन सामान्यप्रयोगे इत्यस्यानर्थकत्वात्। तस्मादविशेष्यस्य सापेक्षत्वेऽपि तत्र सामर्थ्यविधायकमित्यवधार्यते। तेन भवत्येव राजपुरुषः सुन्दरः इति प्रयोगः।

अत्र वैयाकरणाः-यथा पङ्कजशब्दे अवयवशक्त्य-तिरिक्ता समुदायशक्तिः स्वीकृता तथैव राजपुरुषः इत्यादौ समासेऽपि अवयवशक्तितो भिन्ना समुदायशक्तिरङ्गीकार्या। सा च शक्तिः राजसम्बन्धविशिष्टपुरुषविषयकबोधजनिका। अत एवात्र विषये अजहत्स्वार्थवृत्तिपक्ष एवाङ्गीक्रियते। एतत्पक्षानुसारं पदानि निरर्थकानि। सार्थकं तु तत्समुदितं वाक्यमेव। अत एवात्र मते राजपुरुष इत्यादौ राजपदार्थे ऋद्धस्येति विशेषणान्वयवारणाय वृत्तस्य विशेषण योगो न इति नियमोऽप्यनङ्गीकार्य एव भवति।

न चैवं समासघटकपदानां निरर्थकत्वे महावाहुः सुपन्था इत्यादावत्वं न स्यात् अर्थवद्ग्रहणपरिभाषया सार्थके एव महच्छब्दे पथिन् शब्दे चात्वविधायकसूत्रस्य प्रवृत्तेरिति-वाच्यम्? वृत्तेः प्रागभाविसार्थकत्वमादायात्वस्य सूपपादनीयत्वात्।

वस्तुतस्तु समासे समुदायशक्तिस्वीकारेऽपि न युक्तोऽवयवशक्तिपरित्यागः। समासेऽवयवशक्तिसहकृतसमुदायशक्तिपक्ष एव प्रतिभाति ज्यायान्। अत एवावयवानामपि सार्थकतया पूर्वपदार्थप्रधानोऽव्ययीभावः उत्तरपदार्थप्रधानस्तत्पुरुषः इत्यादयः प्राचां प्रवादाः सङ्गच्छन्ते। समासे विशिष्टशक्तिस्वीकारादेव जायते समासस्यार्थवत्त्वं ततः प्रातिपदिकत्वञ्च किञ्च विशिष्टशक्तिस्वीकारमन्तरा चित्रगुरित्यादौ स्वाम्याद्यर्थप्रत्ययो न यास्यति। न च लक्षणया तत्प्रतीतिर्वाच्या गोपदस्य तत्स्वामिनि लक्षणायां चित्रापदार्थेन सहान्वये चित्रभिन्नगोस्वामीत्यर्थापत्तेः। चित्रा पदस्य तत्र लक्षणायां चित्रस्वामिगौः इत्यर्थापत्तेश्च समासतः चित्रा भिन्ना गौरिति बोधानन्तरं तादृशो गोस्वामी लक्ष्यते इत्युच्यते चेत् तत्र कस्य पदस्य लक्षणेति विनिगमकस्याभावः।

अतोऽनेकक्लिष्टकल्पनामपहाय वरं समासे अतिरिक्तशक्तिकल्पनमेव। एवञ्च पदनिष्ठोद्देश्यतानिरूपितविधेयताविधेः समासस्य समर्थाश्रितत्वात् यत्रैकार्थीभावरूपं सामर्थ्यं तत्र समासः, यत्र तु व्यपेक्षारूपं सामर्थ्यं तत्र वाक्यमिति द्वैविध्यस्य सुतरामेव सिद्धिरिति, विभाषाधिकारस्यार्थत्वं सिद्ध्यति। नैयायिकरीत्या तु समासे व्यपेक्षावादस्यैव स्वीकरणमिति तन्नये वाक्यं सम्पादयितुं विभाषाधिकारस्यावश्यकर्त्तव्यमिति गौरवम्।

**इदमत्र तत्त्वम्-**

नैयायिकाः समासे खलु केवलमजहत्स्वार्थवृत्तिपक्षमेवाङ्गीकुर्वते। अयम् अजहत्स्वार्थवृत्तिपक्ष एव व्यपेक्षावादः। वैयाकरणनये तु समासे व्यपेक्षालक्षणमेकार्थीभावश्चेति द्विविधं सामर्थ्यमभिमतम्। तत्रैकार्थीभावे समासो भवति। राजपुरुष इत्यादीनि च तदुदाहरणानि। तत्रैव एकार्थीभावे जहत्स्वार्थपक्ष अजहत्स्वार्थपक्षश्चेति पदद्वयमभिमतम्। राजपुरुषः इत्यादौ प्रक्रियादशायां प्रत्येकमर्थवत्वेन गृहीतान्यपि पदानि समुदायशक्त्या विशिष्टैकार्थप्रतिपादकानि भवन्तीति राजाद्यर्थस्य पदार्थैकदेशतया न भवति समासघटकपदार्थस्य ऋद्धादेस्तन्नान्वयः देवदत्तस्य गुरुकुलमित्यत्र तु यत्र कुले गुरुविशेषणं गुरौ च गुरुत्वं विशेषणं तत्र गुरुत्वरूपे पदार्थैकदेशे देवदत्तस्यान्वयो गमकत्वाद् भवत्येव। गमकत्वञ्च वाक्यजन्यशाब्दबोधीयपरस्परनिरूप्य निरूपकभावापन्नविषयताविलक्षणविषयताकशाब्दबुद्धित्वावच्छिन्नाजनकत्वे सति तावदर्थविषयकशाब्दबोधजनकत्वम्। अर्थात् यत्र वृत्तिविग्रहयोः समानार्थकत्वं स्यात् तत्रैव भवति गमकत्वम्। देवदत्तनिरूपितगुरुत्व कुलमितिवृत्त्यर्थात् नातिरिच्यते देवदत्तस्य गुरो कुलमित्यत्र जायमानः प्रत्ययः। ऋद्धस्य राजपुरुषः इत्यत्र तु न तथा अत्र तु ऋद्धस्य राज्ञः पुरुषः इति वाक्यतः ऋद्धाभिन्नो यः राजा तस्य पुरुषः इत्यत्र वृत्तौ तु ऋद्धस्यान्वयः पुरुषे जायते न तु राजनि इति वृत्तिविग्रहयोर्वैभिन्नयस्य स्पष्टत्वात् नात्र गमकत्वमिति युज्यते वक्तुम्। तदुक्तं हरिणा-

**सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः सस्यते।**
**वाक्यवत्सा व्यपेक्षा हि वृत्तावपि न हीयते॥**
**समुदायेन सम्बन्धो येषां गुरुकुलादिना।**
**संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह॥**

अयञ्च एकार्थीभावः राजन् ङस् पुरुष सु इत्यलौकिकविग्रहवाक्ये एव कल्प्यते। यथा पचतीत्यादौ बोधकतारूपां तिबादिशक्तिं तत्स्थानिनि लकारे प्रकल्प्य कर्मणि कर्तरि च विधीयते लकारस्तद्वत् राजपुरुषनिष्ठबोधकत्वाशक्तिः कल्प्यते तदीयेऽलौकिकविग्रहवाक्ये।

एवञ्चालौकिकविग्रहवाक्ये श्रूयमाणानां शब्दानां क्लृप्ताया शक्तिस्तस्यास्त्यागे मानाभवात् प्रत्येकशक्तिसहकारेण समुदायशक्त्या विशिष्टार्थबोध इति साधीयान् पन्थाः। जहत्स्वार्थवृत्तिपक्षस्तु तत्रैव स्वीकरणीयः, यत्रावयवार्थविरूद्धः समुदायार्थः स्यात्। तदुक्तम्-

**जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी।**

अश्वगन्धाश्वकर्णादिशब्दे स्पष्टमेव भासते अवयवार्थविरुद्धः समुदायार्थः औषधिविशेषो व्यक्तिविशेषश्च। अत एव तादृशस्थले एव जहत्स्वार्थवृत्तिपक्षो अङ्गीकार्यः। वैयाकरणमते व्यपेक्षात्मके सामर्थ्ये समासो न भवति, तत्र वाक्यमेवातिष्ठते। समासप्रकरणविभाषाधिकारस्याभिमतात्वेऽपि यत्र पारे मध्ये षष्ठ्या वा द्वितीयतृतीयचतुर्थचतुर्याण्यन्यतरस्याम् इत्यादौ विकल्पवाचकानि पदान्युपन्यस्तानि सन्ति तत्रकार्थीभावमात्रे पाक्षिकत्वं विधीयते न तु व्यपेक्षाया अपि, तादृशविकल्पस्य विभाषाधिकारेणैव सिद्धत्वात्। अत एव पारे गङ्ग मित्यस्याभावपक्षेऽपि एकार्थीभाव सद्भावात् षष्ठीसमासेन गङ्गापारमित्यपि सिद्ध्यति। विभाषाधिकारात् व्यपेक्षया च गङ्गायाः पारमिति वाक्यमपीति स्पष्टं भाष्यादौ।

**प्राचार्यः, श्री दादू आ. सं. महाविद्यालयः जयपुरम्**

# आचारविमर्शविषयकमानवाधिकाराः

❑ रमेशचन्दबुनकरः

आचारहीनं न पुनन्ति वेदाः इति भारतीयानामस्ति काचिद् आचारपरम्परा। आचारहीनो जनः पशुवत्। आचारः व्यवहारश्च मुख्यं लक्ष्यं मानवजीवनस्य। महाभारतं तु आचारसंहितारूपेण विख्याता वर्तते सर्वत्र। आचारविचाराणां समावेशोऽत्र दृश्यत एव। वस्तुत उपदेशस्य त्रिविधा शैली भवति। वेदादिशास्त्रसम्मितोपदेशशैली, सुहृत्सम्मितोपदेशशैली कान्तासम्मितोपदेशशैली च। एतासां त्रिविधशैलीनां दर्शनं महाभारते भवति। अस्येदं वैशिष्ट्यं यत् आख्यानैः आचारविचाराः प्रस्तूयन्ते। धर्मशास्त्ररूपेणेदं प्रथितं विद्वत्समवाये सकलेऽपि। पापपुण्ययोर्विभाजनं, दैवपुरुषकारयोः परस्परसम्बन्ध-निरूपणं, वर्णेषु आश्रमेषु च निवसन् कर्त्तव्यस्य निर्धारणमेते समेऽपि विषया वर्तन्ते महाभारते।

उच्यते अनुशासनपर्वणि -

**यथा मृत्पिण्डतः कर्ता कुरुते यद् यदिच्छति।**
**एवमात्मकृतं कर्म मानवः प्रतिपद्यते।।**

यथा कश्चित् कुम्भकारः मृत्तिकया विभिन्नानि मृत्पात्राणि रचयति तथैव मनुजः आत्मकृतकर्मानुसारमेव फलं प्राप्नोति इति फलितार्थः।

कस्मिंश्चिदपि काले अतिथिविरुद्धं नाचरणीयम्-

उच्यते- **अतिथेः प्रतिकूलं ते न कर्तव्यं कथञ्चन।**
**येन येन च तुष्येत नित्यमेव त्वयातिथिः।**
**अध्यात्मनः प्रदानेन न ते कार्या विचारणा।।**

येन येन वस्तुना अतिथिः सन्तुष्टो स्यात्, तेषु तेषु च कार्येषु स्वयमेव नियोजयेत् एव स्वात्मानम्। दैवपुरुषार्थयोः कः श्रेष्ठ इति विषयं महता वैशद्येन अङ्गीचकार -

**बीजतो ह्यङ्कुरोत्पत्तिरङ्कुरात् पर्णसम्भवः।**
**पर्णान्नालाः प्रसूयन्ते नालात् स्कन्धः प्रवर्तते।।**
**स्कन्धात् प्रवर्तते पुष्पं पुष्पान्निवर्तते फलम्।।**
**फलान्निवर्त्यते बीजं बीजं नाफलमुच्यते।।**
**नाबीजं जायते किञ्चिन्न बीजेन बिना फलम्।**
**बीजाद् बीजं प्रभवति बीजादेव फलं स्मृतम्।।**
**यादृशं वपते बीजं क्षेत्रमासाद्य कर्षकः।**
**सुकृते दुष्कृते वापि तादृशं लभते फलम्।।**
**यथा बीजं विना क्षेत्रमुप्तं भवति निष्फलम्।**
**तथा पुरुषकारेण विना दैवं न सिध्यति।।**
**क्षेत्रं पुरुषकारस्तु दैवं बीजमुदाहृतम्।**
**क्षेत्रबीजसमायोगात् ततः सस्यं समृद्ध्यते।।**
**कर्मणः फलनिर्वृत्तिं स्वयमश्नाति कारकः।**
**प्रत्यक्षं दृश्यते लोके कृतस्यापकृतस्य च।।**
**शुभेन कर्मणा सौख्यं दुःखं पापेन कर्मणा।**
**कृतं फलति सर्वत्र नाकृतं भुज्यते क्वचित्।।**
**कृती सर्वत्र लभते प्रतिष्ठां भाग्यसंयुताम्।**
**अकृती लभते भ्रष्टः क्षते क्षारावसेचनम्।।**

अर्थात् बीजात् अङ्कुर उत्पद्यते, अङ्कुरात्पत्राणि भवन्ति। पत्रेभ्यः नालं जायते, नालेभ्यः स्कन्धो जायते, स्कन्धेभ्यः पुष्पं, पुष्पात् फलं, फलात् बीजं, बीजं कदापिन निष्फलत्वमेति। बीजं बिना किञ्चिदपि न उत्पद्यते, बीजं बिना फलमपि न सेवते। बीजात् बीजम् उत्पद्यते, बीजात् फलमुत्पद्यते। यादृशं क्रियते कर्म तादृशमेव फलं लभते इत्याशयः। यथा बीजं बिना उप्तं निष्फलं भवति तथैव प्रारब्धोऽपि पुरुषार्थं बिना सिद्धतां नाप्नोतीति। कथ्यते तर्हि-

''उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः।'' शुभकर्मणा सौख्यं, दुःखकर्मणा दुःखं च जायते इति निश्चप्रचम्। स्वात्मना कृतं कर्म एव सर्वत्र भुज्यते इत्यत्र नास्ति काचिद् संशीतिः। सर्वत्रापि पुरुषार्थी जनः भाग्यानुसारं प्रतिष्ठां लभते। पुरुषार्थेणैव सर्वं जायते- पुरुषार्थ एव महान् -

**तथा स्वर्गश्च भोगश्च निष्ठा या च मनीषिता।**
**सर्वं पुरुषकारेण कृतेनेहोपलभ्यते।।**

अस्मिन् जगति पुरुषार्थेण स्वर्ग-भोग-धर्मनिष्ठा-बुद्धिमत्ताश्च प्राप्यन्ते। तस्मादुच्यते कः केभ्यः साधनेभ्यः किं प्राप्नोति-

**शौचेन लभते विप्रः क्षत्रियो विक्रमेण तु।**
**वैश्यः पुरुषकारेण शूद्रः शुश्रूषया श्रियम्।।**

ब्राह्मणः शौचाचारेण, क्षत्रियः पराक्रमेण, वैश्यः उद्योगेन शूद्रश्च शुश्रूषया श्रियमाप्नोति।

**आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः।**
**आत्मैव ह्यात्मनः साक्षी कृतस्याप्यकृतस्य च।।**
**कृतं चाप्यकृतं किञ्चित् कृते कर्मणि सिद्ध्यति।**
**सुकृतं दुष्कृतं कर्म न यथार्थं प्रपद्यते।।**

अर्थात् आत्मा एव स्वकीयबन्धुः वर्तते। आत्मा एव स्वकीयशत्रुः। आत्मा एव स्वकर्मणः साक्षी वर्तते।

उच्यते - **देवानां शरणं पुण्यं सर्वं पुण्यैरवाप्यते।**
**पुण्यशीलं नरं प्राप्य किं दैवं प्रकरिष्यति।।**

पुण्येनैव सर्वं प्राप्नोति मनुजः।

**यथा तैलक्षयाद् दीपः प्रह्रासमुपगच्छति।**
**तथा कर्मक्षयाद् दैवं प्रह्रासमुपगच्छति।।**

तैलं समाप्ते सति यथा दीपकः प्रह्रासमुपगच्छति तथैव कर्मक्षयाद् दैवमपि नाशत्वमुपैति।

सम्प्रति कर्मफलमुच्यते -

**यस्यां यस्यामवस्थायां यत् करोति शुभाशुभम्।**
**तस्यां तस्यामवस्थायां भुङ्क्ते जन्मनि जन्मनि।।**

यस्यामवस्थायां यत् कर्म क्रियते तस्य फलं नूनमेव लभते। प्रत्येकस्मिन् जन्मनि स तस्य फलं भुज्यते इति।

**यथा धेनुसहस्रेषु वत्सो विन्दति मारतम्।**
**एवं पूर्वकृतं कर्म कर्तारमनुगच्छति।।**
**अचोद्यमानानि यथा पुष्पाणि च फलानि च।**
**स्वकालं नातिवर्तन्ते तथा कर्म पुरा कृतम्।।**

पूर्वकृतं कर्म अवश्यमेव कर्त्तुः पश्चात्धावति। पूर्वकृतं कर्म समयेनैव फलति। समयात्पूर्व तस्य फलं न लभते। कर्मसिद्धान्तोऽयम्। आचारसंहिताया विशिष्टोऽयं सिद्धान्तः कर्म एव अन्ते अवशिष्यते। यादृशं यस्य कर्म तस्य फलं नूनमेव च आप्नोतीति। एलोके कथं व्यवहर्तव्यमस्माभिः-

उच्यते भीष्मेण -

**कायेन त्रिविधं कर्म वाचा वापि चतुर्विधम्।**
**मनसा त्रिविधं चैव दशकर्मपथांस्त्यजेत्।।**

शरीरेण कर्मत्रयं, वाण्या कर्मचतुष्टयं, मनसा च कर्मत्रयं सर्वथा परित्यजेत्।

**प्राणातिपातः स्तैन्यं च परदारानथापि च।**
**त्रीणि पापानि कायेन सर्वतः परिवर्जयेत्।।**

अपरेषां प्राणनाशः, स्तेयं परदारसंसर्गश्चेति कायजं पापं सर्वथा परित्यजेत्।

**असत्प्रलापं पारुष्यं पैशुन्यमनृतं तथा।**
**चत्वारि वाचा राजेन्द्र न जल्पेन्नानुचिन्तयेत्।।**

व्यर्थप्रलापं, पारुष्यं, पैशुन्यम् अनृतञ्चैते (चैते) वाचा न प्रकाशयेत् सुधीः।

**अनमिथ्या परस्वेषु सर्वसत्त्वेषु सौहृदम्।**
**कर्मणां फलमस्तीति त्रिविधं मनसा चरेत्।।**

परधनस्य अनिछा, समस्तेषु प्राणिषु मैत्रीभावः, कर्मणः फलमवश्यमेव भवितेति मनसि स्थापनीयं सदा।

**तस्माद् वाक्कायमनसा नाचरेदशुभं नरः।**
**शुभाशुभान्याचरन् हि तस्य तस्याश्नुते फलम्।**

मनसा, वाचा कर्मणा अशुभं कर्म न कुर्यात् यतोहि यादृशं कर्म सः करोति तादृशमेव फलं स लभते इति निर्विवादं सत्यमेव।

मनुष्यजीवनस्य सन्ति पञ्चवृत्तयः –

**विद्या वार्ता च सेवा च कारुत्वं नाट्यता तथा।**
**इत्येते जीवनार्थाय मर्त्यानां विहिताः प्रिये।।**

विद्या, वार्ता, सेवा, शिल्पकला, नाट्यकला एते पञ्च वृत्तयः प्राणिनां कृते।

विद्यया स्फीयते ज्ञानं ज्ञानात् तत्त्वविदर्शनम्।

दृष्टतत्त्वो विनीतात्मा सर्वार्थस्य च भाजनम्।।

ज्ञानाचरणं विद्यया एव वर्धते। सम्प्रत्युच्यते शिष्टाचारस्य लक्षणम्। कतिविधः शिष्टाचारः? कथं शिष्टाचारस्य प्रयोगः कर्तव्यः?

वस्तुतः पुरुषद्वयं भवति। साधुः असाधुः च। तर्हिं साधुः कः उच्यते–साधवः शीलसम्पन्नाः, शीलयुक्ता एव साधवो भवन्ति। असाधव दुराचारिणो दुर्धर्षाः उद्दण्डाश्च भवन्ति। साधवः कथं शिष्टाचारप्रयोगं कुर्वन्ति–

**पञ्चानामशने दत्त्वा शेषमश्नन्ति साधवः।**
**न जल्पन्ति च भुञ्जाना न निद्रान्त्वार्द्रपाणयः।।**
**तीर्थानां गुरवस्तीर्थं मोक्षाणां हृदयं शुचि।**
**दर्शनानां परं ज्ञानं संतोषः परमं सुखम्।।**

तीर्थेषु गुरुरेव तीर्थः, पवित्रवस्तुषु इदमेव पवित्रस्थानम्। परमार्थतत्त्वज्ञानमेव श्रेष्ठं दर्शनं, सन्तोष एव परमं सुखम्।

**ब्रह्मचर्यं तपः क्षान्तिर्मधुर्मासस्य वर्जनम्।**
**मर्यादायां स्थितिश्चैव शमः शौचस्य लक्षणम्।**
**ब्राह्मणान् नावमन्येत गुरून् परिवदेन्न च।**
**यतीनामनुकूलः स्यादेष धर्मः सनातनः।।**

शान्तिपर्वण्यपि आचारविचारयोः शिष्टाचार-व्यवहारयोः समुपवर्णनं वर्तते–

तद्यथा –

**मातापित्रोर्गुरूणां च पूजा बहुमता मम।**
**इह युक्तो नरो लोकान् यशश्च महदश्नुते।।**
**एत एव त्रयो लोका एत एवाश्रमास्त्रयः।**
**एत एव त्रयो वेदा एत एव त्रयोऽग्नयः।।**

लोकेऽस्मिन् मातृ-पितृगुरुणां पूजनम् अर्चनं च सर्वप्रामुख्येन विद्यत एव। एते त्रयो लोकाः, त्रयः आश्रमाः, त्रयो वेदाः, त्रयः अग्नयश्चेति।

**दशैव तु सदाऽऽचार्यः श्रोत्रियानतिरिच्यते।**
**दशाचार्यानुपाध्याय उपाध्यायान् पिता दश।।**
**पितृन् दश तु मातैका सर्वा वा पृथिवीमपि।**
**गुरुत्वेनाभिभवति नास्ति मातृसमो गुरुः।।**

दशेभ्यः श्रोत्रियेभ्यः आचार्यः, उपाध्यायो दशेभ्यः आचार्येभ्यः, पिता दशेभ्यः उपाध्यायेभ्यश्च, मातृसमम् अन्यः नास्ति। अत एवोच्यते–

**मित्रद्रुहः कृतघ्नस्य स्त्रीघ्नस्य गुरुघातिनः।**
**चतुर्णां वयमेतेषां निष्कृतिं नानुशुश्रुम।।**

सत्यासत्यविवेचनमपि महाभारते वर्णितमस्ति। किं नाम सत्यं, किञ्चासत्यम्। कथं कुत्र वा सत्यं वक्तव्यम्, असत्यं वा। विचार्यते– सत्यस्य वचनं साधु न सत्याद् विद्यते परम्। सत्यं वक्तव्यम्। नास्ति सत्यात् परो धर्मः।

**भवेत् सत्यं न वक्तव्यं वक्तव्यमनृतं भवेत्।**
**मात्रानृतं भवेत् सत्यं सत्यं वाप्यनृतं भवेत्।।**

**तादृशो बध्यते वालो यत्र सत्यमनिष्ठितम्।**
**सत्यानृते विनिश्चित्य ततो भवति धर्मवित्।।**
**प्राणात्यये विवाहे च वक्तव्यमनृतं भवेत्।**
**अर्थस्य रक्षणार्थाय परेषां धर्मकारणात्।।**

वक्तव्यं सत्यमर्थात् सत्यं हितनिष्ठं स्यात्। प्राणसङ्कटसमये विवाहावसरे, अपरेषां धनरक्षायै, धर्मरक्षायै चानृतं वक्तुं शक्यते।

अत एवोच्यते –

**यस्मिन्यथा वर्तते यो मनुष्य-**
**स्तस्मिंस्तथा वर्तितव्यं स धर्मः।**
**मायाचारो मायया बाधितव्यः**
**साध्वाचारः साधुना प्रत्युपेयः।।**

आचारविषयेऽस्मिन् सम्प्रति शीलविषये चर्चा अस्ति–शीलं नाम किम् ?

**अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा।**
**अनुग्रहश्च दानं च शीलमेतत् प्रशस्यते।।**

मनसा वाचा कर्मणा सर्वभूतेषु अद्रोहः, सर्वेषु भूतेषु दया यथाशक्तिः दानम्। शीलमेतत् उच्यते। सन्ति तादृशा महापुरुषाः येषु शीलं, शिष्टाचारः, व्यवहारः, च विराजन्ते। तेषां लक्षणम् उच्यते –

**येष्वावृसक्तिभयं नास्ति परलोकभयं न च।**
**नामिषेषु प्रसङ्गोऽस्ति न प्रियेष्वप्रियेषु च।।**

येषाम् आसक्तिर्नास्ति भोगेषु, परलोकेभ्योऽपि भयं नास्ति।

**लाभालाभौ सुखदुःखे च तात**
**प्रियाप्रिये मरणं जीवितं च।**
**समानि येषां स्थिरविक्रियाणां**
**बुभुत्सतां सत्त्वपथे स्थितानाम्।।**
**धर्मप्रियांस्तान् सुमहानुभावान्**
**दान्तोऽप्रमत्तश्च समर्थयेथाः।**
**दैवात् सर्वे गुणवन्तो भवन्ति।**
**शुभाशुभे वाक्प्रलापास्तथान्ये।।**

अर्थात् लाभालाभे सुखे च दुःखे ये साम्यावस्थायां भवन्ति। ममता अहङ्कारशून्या श्च वर्तन्ते। आध्यात्मिक-चिन्तनपथि ये सदैवारूढा भवन्ति, ते एव महापुरुषाः।

**सत्यं सत्सु सदा धर्मः सत्यं धर्मः सनातनः।**
**सत्यमेव व्यवस्येत सत्यं हि परमा गतिः।।**
**सत्यं धर्मस्तपो योगः सत्यं ब्रह्म सनातनम्।**
**सत्यं यज्ञः परः प्रोक्तः सर्वं सत्ये प्रतिष्ठितम्।।**

सत्यमेव श्रेष्ठो धर्मः। सत्यात् ऋते नान्यद् किञ्चिद् लोके प्रतिष्ठितम्। अयमेव सनातनरूपेण तिष्ठति सर्वत्र सर्वदा। लोकेऽस्मिन् त्रयोदश भेदाः (सत्यस्वरूपाः) च वर्णिताः। ते च यथा–

**सत्यं च समता चैव दमश्चैव न संशयः।**
**अमात्सर्यं क्षमा चैव ह्रीस्तितिक्षानसूयता।।**
**त्यागो ध्यानमथार्यत्वं धृतिश्च सततं स्थिरा।**
**अहिंसा चैव राजेन्द्र सत्याकारास्त्रयोदश।।**

सत्यं, समता, दमः, अमात्सर्यं, क्षमा, लज्जा, तितिक्षा, अनसूया, त्यागः, परमात्मनोध्यानं श्रेष्ठाचरणं धैर्यम् अहिंसा-एते त्रयोदश सत्यस्वरूपाः वर्तन्ते। नास्त्यत्र संशयावकाशः।

**धर्मो योनिर्मनुष्याणां देवानाममृतं दिवि।**
**प्रेत्यभावे सुखं धर्माच्छश्वत्तैरुपभुज्यते।।**

धर्म एव मनुष्याणां योनिः। स्वर्गे तदेवामृतम्। धर्मेणैव जीविनः सुखं यान्ति इति।

**इत्थमाचारविषयकं महज्ज्ञानमत्र प्रपञ्चितम्।**

शोधच्छात्रः
ज.रा.रा.सं. विश्वविद्यालयः, जयपुरम्

# जातकग्रन्थोक्तेषु स्त्रीजातकयोगेषु 'विषकन्यायाः' स्वरूपं तत्फलञ्च

❑ वन्दना शर्मा

भारतीयज्योतिषशास्त्रं स्कन्धत्रयात्मकमस्ति-सिद्धान्तः होरा संहितेति। स्कन्धत्रयात्मके ज्योतिषशास्त्रे जातकस्कन्धो मुख्यतया ज्योतिषप्राणभूतो लोकोपकारी सद्यश्चमत्कारकारी चेति। यत् जन्मकालिकग्रहनक्षत्रतिथि-राश्यादीनाधारीकृत्य फलादेशः क्रियते तज्जातकम्। जातकग्रन्थेषु स्त्रीजातकानां तशुभाशुभलक्षणानां स्वतन्त्ररूपेण अध्यायाः प्राप्यन्ते। वर्तमानसमये जातकग्रन्थेषु स्त्रीजातकयोगानां विशेषरूपेण विचारः क्रियते। यतोहि जातकस्कन्धे स्त्रीजातकनाम्ना विशिष्ट-ग्रहयोगफलानि उपलभ्यन्ते। युगपरिवर्तनेन सह समाजस्य दृष्टिकोणे परिवर्तनं दृश्यते। आधुनिककाले स्त्री अपि स्वपूर्णशक्त्या उपयोगं कृत्वा गृह-परिवार-समाज-राष्ट्र-विश्वस्य च प्रगत्यां स्वसहयोगं दातुमिच्छति। यत् स्त्रीणां शुभाशुभफलानि स्त्रीणामङ्गलक्षणानि च विचार्यन्ते तत् स्त्रीजातकमिति। अत्र पुरुषविषयकफलं विहाय स्त्रीषु यानि फलानि जायन्ते तानि स्त्रीविषयक-फलानि विचार्यन्ते। स्त्रीफलविषये यद्यपि सर्वत्र वर्णनं प्राप्यते तथापि फलनिर्धारणे बहूनि मतानि आचार्योपदिष्टदिशा प्रचलितानि वर्तन्ते। एतादृशं लक्षणं सारावल्यां प्राप्यते तद्यथा-

**स्त्रीणां जन्मफलं तुभ्यं पुंभिः सार्धं तदुच्यते।**
**विशेषस्तत्र यो दृष्टः कथ्यते विस्तरेण सः।।**
**वैधव्यं निधने चिन्त्यं शरीरं जन्मलग्नतः**
**सप्तमे पतिसौभाग्यं पञ्चमे प्रसवस्तथा।।**

तत्र स्त्रीजातकानां कृते स्थलविशेषे कुत्रचित् विषकन्या-सन्यासिनी-ब्रह्मवादिनीसदृशयोगाः अपि प्राप्यन्ते। अत एव स्त्रीणां कुण्डल्यां पूर्वोक्ताः विषयाः तु सामान्यरूपेण गृहीताः परन्त्वत्र विषकन्यायोगानां ज्ञानमपि महत्त्वपूर्णं भवति। यतो हि योगेऽस्मिन् पत्यादिसमेषां जीवनजातानां सुखानाम् अभावः भवत्येव।

विषकन्यायाः स्वरूपस्य अध्ययनेन स्पष्टं प्रतिभाति विषकन्यायाः प्रकारद्वयं। तत्र प्राचीनकाले नृपशत्रुसंहरणार्थं प्रयुक्ता विषयुक्ता कन्या विषकन्यायाः प्रथमं स्वरूपं, द्वितीयं जातकशास्त्रोक्ते अशुभयोगे उत्पन्ना कन्यापि विषकन्या शब्देन व्यवह्रियते।

वैदिकग्रन्थानुसारेण प्राचीनकाले विषकन्यायाः प्रयोगं नृपाः स्वशत्रुसंहरणार्थं कुर्वन्ति स्म। अस्यां प्रक्रियायां ते नृपाः कामपि रूपवतीं कन्यां बाल्यकालतः विषस्य अल्पमात्रा-द्वारा पालयन्ति स्म। तथा च विषयुक्तानां प्राणिनां सम्पर्के तां कन्यां अभ्यस्तां कुर्वन्ति स्म। एतदतिरिक्तं तस्यै संगीतनृत्ययोः ज्ञानं दीयतेस्म। इत्थं सा विषकन्या सिद्धिं प्राप्नोति। विशेषावसरे तां कन्यां युक्त्या छलेन वा शत्रोः पार्श्वं प्रेषयन्ति स्म। अस्यां विषकन्यायां एका विशेषता भवति यत् सा स्वयं तु विषप्रभावं सोढुशक्ता परन्तु तस्याः सम्पर्के आगतः जनः मृत्युं प्राप्नोति। अस्याः मुखेऽपि गरलं भवति, येन कारणेन संभोगकर्ता मानवः रुग्णो भूत्वा मृत्युं प्राप्नोति।

अतः स्त्रीजातके विषकन्यायोगस्य वर्णनं प्रायशः सर्वैः आचार्यैः स्व-स्वग्रन्थे कृतम्। जातकग्रन्थानाम् अनुशीलनेन स्पष्टं भवति यत् विषकन्यायोगस्य महत्त्वं प्राचीनकालतः अद्यावधि पर्यन्तमस्ति। आचार्यगणेशदैवज्ञेन तु जातकालंकारे विषकन्यानाम्नाअध्यायः स्वतन्त्ररूपेण निर्दिष्टः। ऋषिपराशरेणा बृहत्पाराशरहोराशास्त्रे विषकन्या-योगः फलसहितमुद्धृत्य तस्य भङ्गोऽपि निर्दिष्टः।

- जातकग्रन्थेषु विषकन्यायोगाः सर्वैः आचार्यैः एवं

निर्दिष्टा:।

– जन्मकाले आश्लेषा नक्षत्रम्, रविवासर:, द्वितीयातिथि: एतेषां संयोगेन जाता विषकन्या भवति।

– कृत्तिका-शनिवार-सप्तमीतिथिनां संयोगे उत्पन्नाऽपि विषकन्या भवति।

– शतभिषा-भौमवार-द्वादशीनां संयोगे जाता कन्या विषाख्या।

– अथ ग्रहस्थितिवशात् जनुषि सौम्यखेटौ लग्नस्थौ, एकोऽशुभ: गगनग: (दशमस्थ:) तत: द्वौ पापग्रहौ शत्रुगृहस्थौ तदा सा कुमारी विषकन्या भवतीत्यर्थ:।

– यदि जनुषि भूमिसूनु: (भौम:) धर्मस्थ:, शनि: तनुसदनगत:, सूर्य: पञ्चमस्थ: तदानीं सा कुमारी विषकन्या भवति।

– यदि जन्मसमये मन्दा, आश्लेषा, द्वितीया तदनु कुजे सप्तमी वारूणर्क्षे दिनमणिदिवसे द्वादश्यां द्विदैवं च यज्जनि: सा विषाख्या भवति।

– भद्रासा र्पानलवरुणभे भानुमन्दारवारे यस्या: जन्म प्रभवति तदा सा कुमारी विषकन्या जाता।

– यस्या: जन्मसमये अशुभखगयुत: पापे लग्ने पापखेटौ अरिस्थौ तदा सा कुमारी विषाख्या भवति।

– यस्या: कन्याया: जन्मलग्ने शत्रुक्षेत्रगत: एक: पापग्रह: स्यात्तथा तेन सह शुभग्रहद्वयं भवेत्तदा अस्मिन् योगे उत्पन्ना जातिका विषकन्या भवति।

– यदा रविवासरे जन्म भवेत्तदा चन्द्र: भरण्यां स्यात्तदा जाता विषकन्या।

– सोमवासरे चित्रानक्षत्रसंयोगे जाता,

– मूलनक्षत्रयुतभौमवासरे उत्पन्ना कन्या,

– धनिष्ठानक्षत्रयुतबुधवासरे जाता कन्या,

– ज्येष्ठानक्षत्रयुतगुरुवासरे उत्पन्ना,

पूर्वाषाढानक्षत्रयुतशुक्रवासरे एवमेव शनिवासरे रेवतीनक्षत्रसंयोगे जाता कन्या विषकन्या भवति।

एतेषु योगेषु उत्पन्ना जातिका विषकन्या कथ्यते। एषां योगानां प्रभावानुसारेण सा विषकन्या कुल-समाज-राष्ट्राणां कृते अनिष्टफलदात्री भवति। एतादृशी कन्या स्वजन्मानन्तरं पितृकुलक्षयं करोति विवाहानन्तरं च पतिकुलक्षयं करोति। अन्यदपि फलं भावकुतूहलकारेण एवं प्रोक्तम्-

**विषाख्या शोकसन्तप्ता दुर्भगा मृतपुत्रिका।**
**वस्त्राभरणहीना च पुराणैरुदिता बुधै:।।**

इत्थं स्त्रीणां विवाहकालेऽपि लग्नचंद्रयो: विषयोग: ज्ञातव्य: यतो हि शुभाशुभफलं तदधीनं भवति। विषकन्या स्ववंशं तथा विवाहोपरान्तं पतिकुलक्षयं करोति। यतोहि आश्लेषानक्षत्रस्य प्रथमचरणे जाता कन्या श्वश्रूं नाशयति। विशाखाचतुर्थचरणे उत्पन्ना स्वदेवरं नाशयति। तथा च ज्येष्ठानक्षत्रस्य प्रथमे चरणे उत्पन्ना स्वपतिं अवश्यं नाशयति। एवमेव मूलनक्षत्रस्य प्रथमे चरणे उत्पन्ना स्वश्वसुरं नाशयति।

अत: स्त्रीणां विवाहकाले योगस्यास्य महत्त्वं सर्वत्र दूरीदृश्यते। स्त्रीजातकानां कृते योगस्यास्य महत्त्वं प्राचीनकालत: अद्यावधिपर्यन्तं स्वीक्रियते। बृहत्पाराशर-होराशास्त्रे विषकन्यायोगविषये कथितम्-

**भद्रातिथौ कुजार्कार्किदिनेऽहिवरुणाग्निभे।**
**जाताऽङ्गना विषाख्या स्याद् ध्रुवं दुष्फलभागिनी।।**
**शुभोऽशुभश्च तनुगोऽशुभावरिगृहस्थितौ।**
**यदीयजन्मसमये कुमारी सा विषाभिधा।।**
**विषयोगोद्भवा बाला मृतापत्या प्रजायते।**
**वासोभूषाविहीना च ससन्तापशुचान्विता।।**
**तनोर्वेन्दोरपि शुभो जायेशो वापि सप्तमे।**
**स्थितस्तर्हि विषाख्योऽसौ भोगो नश्यत्यसंशयम्।।**

अत: स्त्रीजातकानां जन्माङ्गे विषकन्यायोगस्य महत्त्वं वर्तते।

**शोधच्छात्रा**, ज.रा.रा.सं. विश्वविद्यालय:, जयपुरम्

❑ म.म. देवर्षिकलानाथशास्त्री

# पुस्तकसमीक्षा

## व्याकरणशास्त्रीयशोधः

पाणिनीयं व्याकरणं संस्कृतगिरः सञ्जीवनीति सर्वविदितम्। भगवतः पाणिनेरष्टाध्यायी केवलं 3386 सूत्रबद्धाऽस्ति (स्वरवैदिकीसहितं 3978) किन्तु तयाऽपरिगणनीयो महाविशालः शब्दसंसार उत्पादित इत्येव न, सहस्राब्दीभ्यः पाणिनीयव्याकरणमवलम्ब्य लक्षशो ग्रन्थाः, टीकाः, विमर्शाः, फक्किकाः, भाष्यादयश्च विद्वद्भिर्व्यलेखिषतेति विस्मयकरोऽस्य महिमा समस्तेऽपि विश्वे। पाणिनिव्याकरणमवलम्ब्य पतञ्जलिनागेशभट्टादीनां ये शास्त्रीयविमर्शा विविधविषयकाः समुदभवन्, तेषु विविधान् विषयान् विमृशन्तः शोधलेखा जयपुरीयेण विदुषा राजस्थान विश्वविद्यालयीय-दर्शन विभागाध्यक्षेण, तत्रैवोच्चतराध्ययनकेन्द्रसमन्वयकपदधारिणा डॉ. राजेन्द्रप्रसादशर्मणा समये समये व्यलेखिषत। तेषां सङ्कलनं ग्रन्थाकारे सपद्येव प्रकाशितमस्ति यत्र 8 शोधलेखाः संस्कृते, 6 हिन्द्यां विलिखिताः सन्ति।

पाणिनिना शास्त्रलाघवार्थं कीदृशाः पन्थानोऽनुसृताः (अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणा इति सुप्रथितमेव), किं शब्दानां बौद्धार्थोऽनुसरणीयो लोकजार्थो वा इत्यादिविषयानवलम्ब्य सप्रमाणोद्धरणं विषयविवेचनं द्रष्टुं शक्यतेऽत्र। शिवसूत्राणां नन्दिकेश्वरव्याख्या, वर्णमातृकाः शक्तिपीठानि चेत्यादयो विषया अपि विवेचिता अत्र।

राजस्थानसंस्कृतअकादम्या वित्तीयसाहाय्येन प्रकाशितोऽयं ग्रन्थो लेखकस्य डॉ. राजेन्द्रप्रसादशर्मणो नवीनमेकमायामं प्रकटयेदिति स्पष्टम्। सोऽयं दर्शनशास्त्रस्य विद्वांस्तु वर्तत एव तन्त्रशास्त्रे सविशेषमधीती, एकस्यास्तन्त्रशास्त्रीयपत्रिकायाः (श्रीविद्यामन्त्र-महायोग) सम्पादकोऽप्यस्तीति जानाति संस्कृतपरिवारः। अस्य व्याकरणशास्त्रविमर्शोऽप्यस्मिन् ग्रन्थे प्रतिफलित इति ग्रन्थस्यास्य प्रकाशनोपलक्ष्ये वर्धापयामि विद्वांसमेनम्।

**व्याकरणशास्त्रीयानुसन्धानम् ले. डॉ. राजेन्द्रप्रसादशर्मा प्रका. राष्ट्रीयसंस्कृतसाहित्यकेन्द्र, 222 सरस्वती सदन, बिहारीजी की गली, सौखियों का रास्ता, किशनपोलबाजार, जयपुर, पृ.सं. 184 मू. 400/-.**

## एकलिङ्गकाव्यम्

विश्वप्रसिद्धानां वीरवराणां महाराणाप्रताप-महाराणा कुम्भाप्रभृतीनां मेवाड (मेदपाट) राज्याधीशानामुपास्यदेवो भगवान् शिवः मेदपाटेश्वर एकलिङ्गः प्रकीर्त्यते। एतस्य सुमहन्मन्दिरमद्यापि भक्तानां प्रणतिकेन्द्रमस्ति। मन्दिर- स्यास्य स्थापनायां विनिर्माणे च पञ्चदश्यां शताब्द्यां जातानां महाराणाकुम्भाप्रभृतीनां विपुलं योगदानमासीत्। तदानीमेव मेदपाटराज्याश्रितेन महाकविना कन्हव्यासेन एकलिङ्गमाहात्म्यनामकं काव्यं व्यरच्यत। तत्पूर्वमपि भूभागेऽस्मिन् महाकवयोऽभूवन् यैः मेदपाटस्य राजवंशोत्पत्तिवर्णनपराणि, राजप्रशस्तिपराणि च काव्यानि व्यरच्यन्त, सुललितानि पद्यानि व्यलेख्यन्त।

एवंविधानां कतिपयकाव्यरचनानां संकलनं हिन्द्यनुवादं च विधाय उदयपुरस्थेन सुप्रथितेन साहित्यसेवकेन श्रीकृष्ण ''जुगनू'' इत्याख्येन तत्पुत्र्या अनुभूतिचौहान इत्याख्यया च एकलिङ्गमाहात्म्यकाव्यं, मेदपाटराजवंशोत्पत्तिवर्णनकाव्यं शिवस्तुतिपद्य-संकलनादिकं चैकत्र संगृह्य ग्रन्थ एकः प्राकाश्यमानायित इति हर्षास्पदम्। अस्य ग्रन्थस्य पूर्वार्धे कन्हव्यासविरचितस्य एकलिङ्गमाहात्म्यस्य चत्वारः सर्गाः (अन्यतोऽपि पद्यानां संग्रहः कृतः स्यादिति विचिन्त्य ''अध्याय'' इत्येषां नामकरणमत्रोल्लिखितं प्रतीयते) प्रकाशिताः, तदनन्तरं मेदपाटवर्णनपराणि पद्यानि, मेदपाटराजवंशोत्पत्तिवर्णनपराणि पद्यानि, अन्यानि च संगृहीतानि प्रतिपद्यं

हिन्द्यनुवादसहितानि प्रकाशितानि सन्ति।

भूमिकायां पादटिप्पणीषु च गुहिलवंशेतिहास (मेदपाटराजवंशेतिहास) विवरणपराष्टिप्पण्यः प्रत्ताः सन्ति याः शोधार्थिनामुपकारिकाः स्युः।

अन्ते बहुरंगचित्राण्यपि मुद्रितानि।

**श्रीमद्एकलिङ्गमाहात्म्यम् (मोहनबोधिनीटीका समुपेतम्) सम्पा. डॉ श्रीकृष्ण जुगनू अनुभूति चौहान प्रका. परिमल पब्लिकेशन्स, 27/28, शक्तिनगर, दिल्ली-7, पृ. सं. 180, मू. 250/-.**

## आधुनिकं नाटकम्

संस्कृतसाहित्ये दश रूपकभेदाः सुविदिताः, शाकुन्तलादिनाटकानि, भाणव्यायोगादयोरूपकभेदा अपि सुज्ञाताः। आधुनिके काले रेडियोनाटकानि (ध्वनिनाटकानि), चलचित्राण्यपि संस्कृते समवातरन्। एकाङ्क-नाटकान्यप्यभिनीयन्ते। अस्मिन्नेव क्रमे आधुनिक-यौतुक-समस्यामाधारीकृत्य नूतनशैल्यां राजस्थानीयेन साहित्य-कारेण पं. साँवरमलशास्त्रिणा पञ्चस्वङ्केषु छात्रैरभिनेयं, अन्यथाऽपि मञ्चेऽवतारणीयं नाटकमेकं विलिखितं सद्यः प्रकाशमाप्तं यत्र प्रत्यङ्कमनेकानि दृश्यान्यपि सन्ति। अत्र विस्मयजनके घटनाचक्रे तदिदं प्रतिपादितमस्ति यदेका विशाखानाम्नी कन्याऽर्थलोलुपे कस्मिंश्चन् परिवारे परिणाय्यते किन्तु यौतुकस्याभावात् सा गृहाद् विनिष्कास्यते। यानस्याधस्तादात्मघातं चिकीर्षतीं तां काचन विख्याता चिकित्सिका स्वगृहमानयति, चिकित्साशास्त्रं पाठयति, सा चिकित्सिका संजायते। नियतेश्चक्रेण तस्या अर्थलोलुपः स श्वशुरो हृद्रोगग्रस्तस्तस्या एव चिकित्सालये समायाति। सा निःशुल्कं तदुपचारं करोति, पर्यन्तं प्रभूतधनराशिं प्रदाय विसर्जयति। लज्जन्तामनेन यौतुकलुब्धा इति लेखकस्याकूतम्।

आधुनिक-परिवेशोपयुक्तं कथानकमाधृत्य सरल-कथोपकथनादिभिः सह स्थाने स्थाने पद्यान्यपि संनिवेश्य विलिखितमिदं नाटकं छात्रैरप्यभिनेतुं शक्येतेति लेखक-स्याशयोऽपि स्पष्टः। अत एव पद्यैः सह पादटिप्पण्यां तस्य च्छन्दसोऽपि नामोल्लिखितम्। प्रारम्भे जननेतृणां विदुषां च सन्देशा अपि मुद्रिताः सन्ति।

**यौतुकम् (नाटकम्) ले. पं. साँवरमल शास्त्री प्रका. सौरभ पब्लिकेशन, आयुर्वेद हिन्दी संस्कृत पुस्तक भंडार, झालानियों का रास्ता, किशनपोल बाजार, जयपुर, पृ.सं. 124, मू. 150/-.**

# संस्कृतसमाचाराः

## पं. सत्यनारायणशास्त्रिणे बाणभट्टपुरस्कारः

सूचनेयं प्राप्ताऽस्ति यदुत्तरप्रदेशसंस्कृतसंस्थानेन प्रत्यब्दं संस्कृतविद्वद्भ्यः, साहित्यकारेभ्यः, पत्रकारे-भ्यश्च ये सम्मान-पुरस्कारादयः प्रदीयन्ते तेषु संस्कृत-गद्यकारेभ्यः प्रदेयो बाणभट्टपुरस्कारो राजस्थानीयाय विद्वत्प्रवराय अजमेरस्थाय विविधकाव्यनाटक-गद्यग्रन्थादिप्रणेत्रे "भारतकुवलयम्" इत्याख्यस्या-लङ्कृतगद्यकाव्यस्य रचयित्रे पं. सत्यनारायणशास्त्रिणे प्रदास्यते (रु. 51000/-) इति घोषितं प्रतिष्ठानेन। वर्धापयति भारतीपरिवारः पं. सत्यनारायण- शास्त्रिणम्।

## डॉ. राजेश्वरीभट्टवर्यायै डी. लिट्. सम्मानः

जयपुरीयसंस्कृतविदुष्यै भारतीपत्रस्य स्तम्भ-लेखिकायै डॉ. राजेश्वरीभट्टवर्यायै फरवरीमासे समायोजिते सोमनाथसंस्कृतविश्वविद्यालयस्य (गुजरात-राज्यस्थस्य) दीक्षान्तसमारोहे डी. लिट्. सम्मानोपाधिं समर्प्य कुलाधिपतिकुलपतिसहितेन विश्वविद्यालय-परिवारेण तस्याः सभाजनमक्रियत। भारतीपरिवारो वर्धापयति विदुषीमिमाम्।

बाबासाहेबआप्टे महोदयानां व्यक्तित्ववर्णने

# सप्तदशः प्रसङ्गः-बालसखित्वं शीलम्।

❑ वेणीमाधव गो. धर्माधिकारी

राजस्थानस्य भूतपूर्वप्रचारकाः श्रीलेखराजशर्माणो वर्णयन्तिः- अहं तदा राजस्थानप्रान्तस्य संघप्रचारक आसम्। श्रीआप्टेमहोदयानां राजस्थाने भ्रमणं निर्धारितमभूत्। ते जयपुरेऽप्यागताः। राजस्थानस्य पुनर्वासविभागस्य महानिदेशकैः श्री एन.आर. मल्कानीमहोदयैर्मेलितुं निर्धारितसमयस्य स्वीकृति-रस्माभिः पूर्वमेव सम्प्राप्ता आसीत्। श्रीमल्कानीमहोदयाः श्रेष्ठतमाः पुरातनकांग्रेससदस्या आसन्। ते अध्ययन-शीलाः अप्यासन्। व्यक्तिं तत्कार्यं च परीक्षणे तेषां तीक्ष्णा दृष्टिरासीत्। बाबामहोदयेन सह अहं तेषां गृहं गतः। किञ्चित्कालं यावत् वार्ता समभवत्, भोजनमपि तेषां गृहे एव सम्पन्नम्। अस्मिन्नन्तराले श्रीमतां मल्कानी-महोदयानां-बालकं दृष्ट्वा बाबामहोदयाः गम्भीररूपेण प्रचलितायां-वार्तायामपि मध्ये मध्ये तेन बालकेन सह वार्तालापं कुर्वन्त आसन्। किञ्चित्कालेनैव तयोः सख्यमिवाभूत्। इदमवलोक्य मल्कानीमहोदयः हसन्न-वदत् यदा कश्चिज्जनः कस्यचिद् गृहं गच्छति स तत्रत्यान्युपकरणानि, आस्तरणादीनि, कक्षसज्जां चावलोकयति। बहुमूल्यानि वस्तुन्यपि द्रष्टुं वाञ्छति। अनन्तरं स तेषां प्रशंसामपि करोति। परं राष्ट्रीयस्वयं-सेवकसंघस्य स्वयंसेवकानामियं विशेषता यत्तेषां चित्तं नान्यत्र गच्छति ते तु केवलमवलोकयन्त्यस्मिन्गृहे कति बालकाः कस्मिंश्च के गुणाः। मल्कानीमहोदयस्यैतद् वचनं श्रुत्वा सर्वेऽप्यहसन्। बाबामहोदयाश्च तस्य बालकस्य हस्तं धृत्वा अस्य सत्यस्य स्वीकृतिं प्रददानाः स्मितं चक्रुः।

बहुसमयपूर्वमपि यावन्मे स्मरणं तेषु दिवसेष्वहं नागपुरे एव पठन्नासम्। बाबामहोदयाः इतस्ततः संघशाखासु भ्रमणं विधाय यदा नागपुरे आयान्तिस्म, मासपंचदशदिनात्मकं च विश्रामं कुर्वन्ति स्म तदा तेषां नियमपूर्वं महत्त्वपूर्णमिदमेव कार्यं येदेकैकं किशोरस्वयं-सेवकमाहूय तद्गृहं वा गत्वा अतिसख्यभावेन वार्तालापः करणीयः। यदि कश्चित्तैर्मिलितुं नागच्छेत्तदा तत्कारणं सम्यक् प्रकारेण विज्ञाय तेन सह सम्पर्कं मित्रतां च कुर्वन्तिस्म। इदमेव कारणं कतिपयेभ्यो युवकेभ्यस्तेषां जीवनेन संघकार्यार्थं प्रचारकत्वं स्वीकृत्य बहिर्गमनार्थं प्रेरणा मिलतिस्म।

युवकैस्सह वार्त्तालापप्रसङ्गे ते बह्व्यः कथाः श्रावयन्तिस्म। आश्चर्यकरमिदं यत्प्राचीनास्वपि कथासु ते नवीनं सन्दर्भं संयुज्य स्वचिन्तनं योजयन्ति स्म येन तासु नवीनत्वमुद्भवतिस्म। इयं तेषां रुचिकरा कला आसीत्। प्राचीनास्वपि कथासु श्रोता औदासीन्यं नानुभवतिस्म। एवं भासतेस्म कथा प्राचीना भवतुनाम परमाप्टे महोदयाः नवीनं किञ्चित् श्रावयन्ति। उदाहरणार्थं मया तेषां मुखाद् वसिष्ठ-विश्वामित्रयोर्विवादस्य कथा श्रुता। तेषां कथनमासीद् बहुवर्षात्मकोऽयं विवादो न द्वयोर्मध्यगो विवादः, अपितु द्वयोश्चिन्तनयोः संघर्ष आसीत्। वसिष्ठः सत्यस्योपासकः विश्वामित्रश्च शक्तेः। वसिष्ठस्य मान्यता-सीत्समाजः आन्तरिकप्रेरणया दृढः प्रजायते विश्वामित्रः शक्त्या एव सर्वं कर्तुं वाञ्छतिस्म। इमं विचारं पोषयन्तस्ते कथायाः विभिन्नान्यङ्गानि प्रस्तुवन्तिस्म। अस्मभ्यं च भासतेस्म अस्माभिर्नवीनं किञ्चित् श्रुतम्। एवमेव नृसिंहावतारकथां ते अत्याचारिणां शासकानां संहारार्थं शान्तेः स्थाने हिंसाया आवश्यकतारूपेण वर्णयन्तिस्म। कियदागणनीयमनेकैस्तरुणस्तेषां मुखादेतादृश्यः कथाः श्रुताः, अवगताः आनन्दश्च प्राप्तः प्रेरणापि लब्धा अन्तः सर्वासामेक एव संघे आगत्य शाखाः प्रवर्द्धनीया इति।

प्रेरकप्रसङ्गशतकम्

# सप्तत्रिंशःप्रसङ्गः-विश्वासःफलदायकः

❑ श्रीमती आराधना धर्माधिकारी

1944 ईस्वीये वर्षे गान्धिमहाभागाः सेवाश्रमादागत्य वर्धानगरे निवासं चक्रुः। ते कुत्रापि केनापि वस्तुना विना स्थातुं शक्नुवन्तिस्म परं प्रार्थनां विना नैव। प्रातः प्रार्थनायाः समयः सार्द्धचतुर्वादनात्मक आसीत्। सर्वे प्रार्थनाभूमावा-गत्योपविष्टाः। वल्लभस्वामिनोऽधुनापि नागताः। तैः पञ्चषण्माइलात्मकादूरादागन्तव्यमासीत्। अद्य गीतापाठोऽपि तैरेव करणीय आसीत्। गान्धिमहाभागाअपि समयेन आगत्य स्वस्थाने उपविष्टाः। तदा सर्वेषु चञ्चलता समुद्भूता यद् वल्लभस्वामिनो नागता इति, अविश्वासश्चोदभवत्-अधुना ते नागमिष्यन्तीति।

एकस्मात्कण्ठादयमविश्वासः प्रस्फुटितः अधुना ते कि-मागमिष्यन्ति अस्माभिः प्रार्थना प्रारब्धव्या। अधुना ते किमागमिष्यन्ति क्षणद्वयं त्रयमेव तु अवशिष्टम्। इयमेव मन्दध्वनिः प्रसृता। तदैव गान्धिमहाभागानां विश्वासः समाधाने जागृतः। अधुना तु क्षणत्रयमवशिष्टं वर्तते कथं नागमिष्यन्तीति।

भाषायाः स्वराः कियन्तः प्रियाः मधुराश्च भवन्ति, अविश्वासस्य भाषा-क्षणद्वयं त्रयमेव त्ववशिष्टम्, विश्वासस्य-भाषा अधुना तुक्षणत्रयमवशिष्टं वर्तते कथं नागमिष्यन्ति। अस्तु अर्द्धक्षणात्पूर्वमेव वल्लभस्वामिनः समागताः। गान्धिमहोदयैः परितस्ताडनमयी दृष्टिर्भ्रामिता। यूयं विश्वासस्य सूत्रमियत्या त्वरया किं त्यजथ।

**विशेषः**- अत्र भाषायाश्चमत्कारस्त्वस्त्येव, अथ च विश्वासस्य महत्त्वमपि ध्वनितम्।

---



# आधुनिकं महर्षिदधीचिस्तोत्रम्

❑ बद्रीप्रसाददाधीच :

स्वर्गसमा धरा पुण्या, शाश्वती इव शोभते।
परहिताय पूज्यन्ते यत्रानेके तपोधनाः।। 1।।
श्रीदधीचे नमस्तुभ्यं, परोपकारकारिणे।
अस्थिदानप्रसन्नाय, तस्मै दधीचये नमः।। 2।।
शान्ताथर्वा च श्रीमन्तौ, पितरौ पूज्यपालितौ।
स्वसा दधिमथी नाम, दध्यङ्ङृषये नमः।। 3।।
दधीचिः ज्ञानदाता च, दधीचि गुणदायकः।
दधीचिः वंशसन्त्राता, तस्मै दधीचये नमः।। 4।।
राक्षसानां प्रकोपेण, देवगणाः भयाकुलाः।
लोके वृत्रपिशाचेन, विभीषिका प्रसारिता।। 5।।
नारायणं नमस्कृत्य देवेन्द्रेण निवेदितम्
तन्निराकरणे कोऽपि, उपायो नैव दृश्यते।। 6।।
नारायणेस्तं प्रोवाच, दधीचिऋषि विद्यते।
यस्य त्रिभुवने कीर्तिः, तस्मै दधीचये नमः।। 7।।
तस्यास्थीनि समानीय, वज्रं निर्माहि तत्क्षणम्।
वृत्रासुरविनाशाय, तस्मै, दधीचये नमः।। 8।।
आग्रहेण सुरैः सर्वैः, महर्षये निवेदितम्।
यच्छन्तु च निजास्थीनि, तस्मै दधीचये नमः।। 9।।
हर्षेण ऋषिणोक्तं च, करोमि देह अर्पणम्।
सकलविश्वरक्षायै, तस्मै दधीचये नमः।। 10।।
ऋषिदेहेन चेन्द्रेणः वज्रायुधं विनिर्मितम्।
तेन वृत्रासुरो नष्टः, तस्मै दधीचये नमः।। 11।।
लोकरक्षाहितं कृत्वा, स्वप्राणानपि योऽत्यजत्।
तत् सदृक्षः विश्वे नास्ति, तस्मै दधीचये नमः।। 12।।
धर्मज्ञः सत्यसन्धश्च, लोकहितस्य रक्षकः।
यशस्वी ज्ञानसम्पन्नः, तस्मै दधीचये नमः।। 13।।
दधीचिः दैत्य-संहर्ता, दधीचिः वरदायकः।
रक्षिता निजधर्मस्य, तस्मै दधीचये नमः।। 14।।
तपोधनः महादानी, शुचिशरीर धारकः।
कपर्दिनः कृपा पात्रं तस्मै दधीचये नमः।। 15।।
रासग्रामशिक्षकेण, श्री दाधीचेन निर्मितः।
श्री दधीचिस्तुतिं कृत्वा, चिरं जीवेत् समाः शतम्।।16।।

व.अ., रा.बा.उ.मा.वि., ब्यावर, जिला-अजमेरुः

# भुवमागता भागीरथी

❑ अभिराज राजेन्द्रमिश्रः

परया भगीरथचर्यया भुवमागता भागीरथी!!

विधिना कमण्डलुमोचिता सलिलैः खनीलिमहारिणी
चन्दिरविभाजलवर्षिणी भुवमागता भागीरथी।। 1।।

धावन्महीपरथाऽनुगा पतनोद्भवद्धम्भारवा
ननु गृष्टिरिव ममतामयी भुवमागता भागीरथी।। 2।।

हिमहार-पारद-पाण्डुरा कर्पूरनदकल्लोलिनी
वापीव सितशरदुत्पला भुवमागता भागीरथी।। 3।।

दयितेन नभसा प्रेषिता वीच्यक्षरैर्दयिताम्प्रति
ननु पत्रिकेव रतिम्भरा भुवमागता भागीरथी।। 4।।

आकाशनायकमूर्धजे शतलक्षकोटितरङ्गकैः
दधतीव कङ्कतिकासुखं भुवमागता भागीरथी।। 5।।

पशुपतिकपर्दगुहागृहे चिक्रीडिषुः कूकूरुतम्
गौरीकुटिलनयनेक्षिता भुवमागता भागीरथी।। 6।।

तापत्रितयसंघट्टने दिव्यौषधिप्रतियातना
सकृदीक्षणेन विमुक्तिदा भुवमागता भागीरथी।। 7।।

उच्चैः क्वचिन्नीचैः क्वचित्क्वचिदन्तरा तिर्यक्क्वचित्
भुजगीव शान्तमधोमुखी भुवमागता भागीरथी।। 8।।

अभिराजजीवनमरुवणं नन्दनवनं ननु कुर्वती
प्रत्यक्षवत्सलदेवता भुवमागता भागीरथी।। 9।।

## गंगा उतर रही हैं धरती पर!!

राजा भगीरथ के महान् प्रयत्न से गंगा उतर रही हैं धरती पर !

ब्रह्मा द्वारा कमण्डलु से मुक्त की गई, अपनी जलराशियों में आकाश की नीलिमा को समेटे चन्द्रिकारूपी जल की वर्षा करती गंगा उतर रहीं हैं धरती पर।।1।।

वेगपूर्वक दौड़ते राजा के रथ का पीछा करती गंगा, अवतरणजन्य हुंकार करती, नई ब्यायी हुई गाय सी ममतामयी प्रतीत हो रही हैं।।2।।

हिम, हार एवं पारे के समान उज्ज्वल, कर्पूरधवल लहरों वाली गंगा शरत्कालीन श्वेतकमलपुष्पों से भरी बावड़ी सी प्रतीत हो रही हैं।।3।।

प्रियतम आकाश द्वारा प्रिया धरित्री के प्रति, तरंगरूपी अक्षरों में लिखी रतिवर्धिनी प्रेमपाती सी प्रतीत हो रही हैं गंगा।।4।।

अपनी सैकड़ों, लाखों तरंगों द्वारा आकाशरूपी नायक के केश कुन्तलों में कंघी फेरने का सुख दे रही हैं गंगा।।5।।

पशुपति भगवान् शिव के जटाजूट-गह्वरों में लुकाछिपी खेलती गंगा, देवी पार्वती के कुटिल नयनों से निहारी जा रही हैं।।6।।

दैहिक, दैविक तथा मानसिक-तीनों तापों की औषधि के समान तथा एक ही बार के दर्शन से मुक्ति देने वाली गंगा पृथ्वी पर उतर रही हैं।।7।।

कभी ऊँची, कभी नीची, कभी दो चट्टानों के बीच से, कभी तिरछी गति से अधोमुखी शान्त भुजगी (नागिन) सी गंगा धरती पर उतर रही हैं।।8।।

अभिराज राजेन्द्र के मरूभूमि सरीखे जीवन को 'नन्दनवन' बनाती प्रत्यक्ष वत्सला देवता गंगा धरती पर आ रही हैं।

# भारतीमञ्जुनिकुञ्जम्

## ( पूर्वानुवृत्तम् )

❑ डॉ. रामनारायणझा

### ध्वनिपोषकः आनन्दवर्धनः

हर्षयन्तीति कामं विदां चेतसः,
वस्तुतश्चारयन्ती ध्वनिं सर्वतः।
वर्धनेन व्यलेखि ध्वनीनां प्रभा,
हा कथं भारते भारती आहता।। 225।।

### मम्मटोक्तकाव्यहेतुत्रयम्

काव्यहेतुत्रयं मम्मटोक्तं मतं,
चात्मके नैपुणी शक्तिरेकेतरा।
काव्यशास्त्रज्ञशिक्षापरा पुस्तके,
हा कथं भारती आहता भारते ।। 226।।

### कविराजः जगन्नाथः तत्कृतरसगंगाधरश्च

न्यायनीत्याशुहृद्यं रसानाञ्च यश्-
चानवद्यङ्कवीनां स गङ्गाधरः।
लोकनाथः कविस्तं लिलेखातिधीः,
आहता हा कथं भारते भारती।। 227।।

वामनो वक्ति रीतिं ध्वनिं कुन्तकः,
वक्रवाचं रसं विश्वनाथः कविः।
नन्दवर्धापकश्चात्मभेदा अमी,
हा कथं भारते आहता भारती ।। 228।।

### न्यूटनात्पूर्वं गुरुत्वाकर्षणवेत्ता ब्रह्मगुप्तः

न्यूटनात्पूर्वमेवात्र दत्तं मतं,
ब्रह्मगुप्तेन पातो धरायामयम्।
प्राकृतो वस्तुजातस्य नित्यं विधि-
राहता हा कथं भारते भारती।। 229।।

### ब्रह्मगुप्तः

खण्डपूर्वं द्वयं खाद्यकं ब्राह्मणो,
ब्रह्मगुप्तेन चारु व्यलेखि स्फुटः।
दिष्टविद्यावता श्रीमता पञ्चितम्,
आहता भारते भारती हा कथम्।। 230।।

पञ्चसिद्धान्तिका जातकान्तं द्वयं,
संहितैका बृहत्पूर्विका ज्यौतिषम्।
विश्वकोषो व्यलेखीति मत्या स्वया,
हा कथं भारते भारती आहता।। 231।।

### वैज्ञानिकभास्कराचार्यः

सिद्धहस्तः कविर्भास्कराचार्यकः,
दैवविद्याविदग्धोऽद्भुतः ज्यौतिषः।
येन विश्रूयते विश्वभूमाविदम्,
आहता भारते भारती हा कथम्।। 232।।

दिष्टविद्याचणैर्बोधनैरर्चितः,
नाम सिद्धान्तशीर्ष्णो मणिं भास्करः।
ग्रन्थमेकं स रत्नोपमं निर्ममे,
आहता हा कथं भारती भारते।। 233।।

### विश्वामरवामनकोषाः

वाणीकोषेषु विश्वोऽमरो वामनः,
भारतीं मातरं भूषयन्तोऽनिशम्।
शब्दराशौ च वृद्धिम्परां कुर्वते,
हा कथं भारती आहता भारते ।। 234।।

व्याख्याता (संस्कृत)
राजकीय कल्याणमहाविद्यालय, सीकर

# शकुन-विमर्शः

❑ देवकीनन्दनशर्मा

शकुनापशकुनज्ञानमेकं वैज्ञानिकविद्याया उपायन-मस्ति। वर्तमाने घटितानां घटनानां सूक्ष्मः प्रभावो बहुकालात्पूर्वमेव पृथिवीवासिषु विशेषतः जीवजन्तुषु प्रारभ्यते। यतोहि ते साक्षात् प्रकृत्या सम्बद्धाः भवन्ति। इदमेव कारणमस्ति यदैतेषां भाव-व्यसन-व्यवहारादिकं दृष्ट्वा शकुनस्य शुभाशुभ ज्ञानं प्राप्तुं शक्यते।

नैकविधा जीवजन्तवः प्रकृतिश्चैव निजक्रिया-प्रतिक्रियाः प्रकटीकृत्य पूर्वसङ्केतैरस्मान् बोधयितुं व्याकुलतया चीत्कारं कुर्वन्ति। एवं चीत्कारेण तेऽस्मान् सावधानान् कुर्वन्ति। प्राचीनकाले एतादृशानां सङ्केतानां सूक्ष्मावलोकनं कृत्वैव ऋषिभिर्मुनिभिर्विद्वद्भिश्च शकुनशास्त्रं विरचितम्।

**शकुनशब्दस्यार्थः परिभाषा च**

शकुनशब्दस्य शाब्दिकोऽर्थः 'पक्षी' वर्तते। अस्या विद्याया नामकरणमपि पक्षिणमाश्रित्यैव जातम्। यदा ज्ञानस्यास्य प्रारम्भोऽभवत्, तदानीं केवलं पक्षिणां दर्शनेन तद्विरुतेन चैव शुभाशुभ घटनानां निर्णयः क्रियतेस्य। पश्चात् शनैः-शनै अन्ये जीवजन्तवोऽपि श्रेण्यामस्यां सम्मिलिताः। शकुनस्य प्राचीनकाले यावन्महत्वमासी-त्तावदेवाद्यापि सिद्धमस्ति। एतेषां शकुनानामुपयोगेन वयं निश्चितमेव लाभमवाप्य कार्यं शुभं कर्तुं शक्नुमः।

सृष्टेः सर्वेऽपि प्राणिनः स्वकर्मबन्धनैः बद्धाः सन्ति। कृतकर्मफलस्य कृत्यकर्मफलस्य च शुभत्वं प्राप्तुं तदुत्तमप्रतिफलप्राप्त्यर्थं या क्रिया क्रियते सैव शकुनं कथ्यते। प्रकृतेः स्वकीयो व्यवहारः स्वकीया शैली च क्रमिकतया विद्येते तत्क्रमस्य पूर्वापरज्ञानमेव शकुनमस्ति। मनसि शुभाशुभस्य पूर्वसूचनाया ज्ञानं शकुनमस्ति। कस्यचिदपि कार्यस्य सिद्धतायाः शुभलक्षणमेव शकुनमिति भावः।

ज्योतिषशास्त्रदृष्ट्या शकुनस्य बहुमहत्वमस्ति। शकुनस्य स्थितिः स्वप्ने स्याद् जाग्रतावस्थायां वा, स्वशरीरे स्यात् संसारे वा, पशुपक्षिभिर्भवेद् दिव्यशक्तिभिर्वा प्रत्येकमपि दशायां तत्तात्पर्यं भवति-वयं सावधानाः भवेम आश्वस्ता वेति प्रत्येकमपि जनः कस्यचिदपि कार्यस्य प्रारम्भं सावधानतया दृष्टिकोणेन शुभे मुहूर्ते कर्तुमिच्छति तथा च तेन सहैव शकुनदर्शनस्यापि परम्परा वर्तते।

**शकुनस्य प्रयोजनम्**

वराहमिहिरेण स्वकीय ग्रन्थे बृहत्संहितायां कथित-मस्ति यत् मानवानां पूर्वजन्मार्जितानि यानि शुभाशुभ-कर्माणि भवन्ति, तेषां कर्मणां शुभाशुभफलनिर्देशनमेव शकुनप्रयोजनम् भवति। तद्यथोक्तम् -

**अन्यजन्मान्तरकृतं कर्म पुंसां शुभाशुभम्।**
**यत्तस्य शकुनः पाकं निवेदयति गच्छताम्।।१।।**
(बृहत्संहिता)

शास्त्रेऽस्मिन् केनचिदपि प्रकारेण अन्धविश्वासा न दृश्यन्तेऽपितु पूर्णतः वैज्ञानिकाः प्राकृतिकाश्च तर्काः कार्याधाररताः सन्ति। यथा वृष्टे आगमनात्पूर्वं पिपीलिकाभिः स्वाण्डानां सुरक्षितस्थानमानयनं, मृत्तिकायाः सुगन्धागमनं, मयूरस्य मधुरः स्वरश्चेत्यादिकं वृष्टेरागमनस्य सङ्केतं प्रकटयति।

प्रायः शकुनापशकुनादिकमस्माकं भारतवर्षेऽस्मिन् प्राचीनकालादेव मन्यते। एतत्सर्वं मानवमनसो धारणायामाधारितमस्ति, न त्वेतस्य कश्चन वैज्ञानिक आधारो दृश्यते अद्यापि जनाः तथ्येष्वेतेषु विश्वासं कुर्वन्ति।

**शकुनस्य भेदाः**

शकुनं शुभाऽशुभभेदेन द्विविधं भवति। शुभे मुहूर्त्ते शुभे शकुने प्राप्ते च सति यात्रायाः कार्यादिकस्य च साफल्यं निश्चितं जायते। यो जनः कार्यं यात्रां वा प्रारभते च शुभे शकुने प्राप्ते सति कार्यसिद्धिं प्रति मानसिकरूपेण पूर्णतः आश्वस्तो जायते तथा च प्रायः परिणामोऽप्यनुकूल एव प्राप्यते। इत्थं जीवने शकुनस्य महिमा न्यूनो नास्ति। वर्तमानकाले बहवः शुभाशुभानि शकुनानि जनश्रुतिष्वा–धारितानि सन्ति।

सामान्यतः यात्राकाले सवत्सा गौः पुरस्तादागच्छेत्, सौभाग्यवती स्त्री स्वपुत्रं क्रोडे गृहीत्वा आगच्छेत्, जलपूर्णौ द्वौ घटौ मार्गे दृष्टौ स्याताम्, दधिपूर्णं पात्रं दृष्टं स्याच्चेत्तर्हि एतानि शुभानि शकुनानि गमनशीलस्य (यात्रिणः) जनस्य दक्षिणभागे भवेयुस्तर्हि तद्यात्रा शुभा भवति। यात्राकाले कश्चन काणो जनो मार्गमागच्छेत् काचित् विधवा ब्राह्मणी मार्गमागच्छेत्, मार्गे रिक्तो घटो दृष्टः स्यात् तर्हि शकुनानि अशुभानि मन्यते। एतेषां प्रायः परिणामोऽप्यशुभं एव प्राप्यते।

प्रायः दृश्यते यत् बालको यदा परीक्षां लेखितुं गच्छति तदा तन्माता तं दधिगुडादिकं खादयति तया चानेन सा विश्वासं करोति यत्तस्याः पुत्रः परीक्षायां साफल्यं प्राप्स्यति। तदिदं शुभशकुनम् मन्यते। एतद्विपरीतं कुत्रचिद् गमनकाले मार्जारो मार्गमागच्छेत्तर्हि मानवमनसि धारणेयमुत्पद्यते यद् यस्य कार्यस्य कृते स गच्छन्नासीत् तदधुना पूर्णं न भविष्यति। तदिदं अपशकुनं (अशुभं) मन्यते।

तृतीय श्रेणी संस्कृत शिक्षक
राजकीय उच्च प्राथमिक संस्कृत विद्यालय
हींगवा, तह. सिकराय, दौसा मो. ९९२९८४०८१०

# निवेदन

**भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.– 09352030291 / 8947055999 पर सूचना लिखवा सकते हैं अथवा SMS भी कर सकते हैं।**

**नाम....................................पुत्र/पुत्री श्री...........................भवन संख्या...........**

**गली/ मोहल्ला/कॉलोनी..................................वाया/पोस्ट ऑफिस..........................**

**तहसील................................जिला........................राज्य..........................**

**देश....................पिन........................................दूरभाष............................**

**मोबाईल नं............................ईमेल....................................................**

**निवेदक सुदामा शर्मा, प्रबन्ध सम्पादक**

**भारती संस्कृत मास पत्रिका**

**बी–15, भारती भवन, न्यू कॉलोनी, जयपुर–302001 (राज.) दूरभाष–2379014**

**ई–मेल – sanskritbharti09@gmail.com**

## बालकाव्यम्

तातो मे रोचते जननी मे रोचते।
चन्द्रो मे रोचते रजनी मे रोचते।
रोचन्ते पुष्पाणि, उद्यानं रोचते...
नृत्यं मे रोचते, गानं मे रोचते।
शाला मे रोचते पठनं मे रोचते...
स्वप्नो मे रोचते, शयनं मे रोचते।
क्रीडनकैर्मित्रैः सह खेला मे रोचते।
श्रावणो रोचते, मेला मे रोचते।
रामस्य कीर्तनं, सीता मे रोचते।
कृष्णाय वन्दनं गीता मे रोचते।
प्राङ्गणं रोचते.. गगनं मे रोचते।
गमनं मे रोचते.. सदनं मे रोचते।

## चटकाः प्रति गीतम्

चटकाः ! चटकाः! आगच्छन्तु।
सन्ति प्राङ्गणे धान्यकणाः
सानन्दं सर्वान् खादन्तु।
पात्रे निहितं तोयं मात्रा
पीत्वा किञ्चित् ननु गायन्तु।
हरिततृणानि क्षेत्रात् नीत्वा
तृणैः कुलायान् इह रचयन्तु।
'चीं ची' नादैः वृक्षाद् वृक्षं
गत्वा सोत्साहं क्रीडन्तु।
यूयं गच्छथ सदा कदम्बे..

❑ ऋषिराजजानी

नभसा किञ्चित् कलं वदन्तु।
पुरतो मेघाः सन्ति क्षितिजे।
गत्वा मेघधनुश्च स्पृशन्तु।

## शीतकालः

शयनं त्यक्तुं नैव कामये।
शीतं तीव्रम् अम्ब ! बाधते।
सूर्यो जातश्चन्द्रसदृशः
पवनो वाति चण्डवेगतः।
विभाति चन्द्रो हिमस्य खण्डः
शीघ्रं भवति च नित्यं प्रातः।
ऊर्णावस्त्रं धृत्वा त्रस्तः
तथापि गात्रं सदा कम्पते।
शून्यकुलायाः, शून्या वृक्षाः
पर्णविहीना जाता शाखाः।
जनहीनाः सर्वेऽपि मार्गाः
विस्मरन्ति क्रीडा ननु बालाः।
वेपन्ते वृद्धा गेहेषु..
अग्निं परितः जनाः आसते..।
मूली-गर्जर-बदरीफलानि..
क्षेत्रे क्षेत्रे नवधान्यानि..
तारकाङ्कितं विभाति गगनम्..
क्रीडां त्यक्त्वा स्मरामि सदनम्..
विविधफलानां स्वादैस्सार्धम्
उष्णभोजनम् अम्ब ! रोचते..।

# बालगीतम्

## नववर्षेऽस्मिन्

❑ परमानन्दशर्मा 'प्रमोद'

भवतु मंगलं नववर्षेऽस्मिन्, नवसंरचना वने वने।।
काको लिखति शुभं सन्देशं, नीलकपोतः प्रेषयति।
रसालवृक्षे महातपस्वी, शुकदेवः तं वाचयति।।
नवपुष्पेष्वपि नूतनहासः, नवतेजो वदने वदने।।
भवतु मंगलं नववर्षेऽस्मिन्, नवसंरचना वने वने।।
गाजो ध्वनयति मधुरं तूर्यम्। नृत्यति बहुविधकपिचतुरः।।
कृष्णकोकिला गायति गीतम्, उष्ट्रो वादयते ढक्काम्।।
चटका चिल्लति भ्रमरो गुञ्जति। भषति च शुनकः क्षणे क्षणे।।
भवतु मंगलं नववर्षेऽस्मिन्, नवसंरचना वने वने।।
सर्वे सुखिनो भवन्तु विश्वे, सर्वे सन्तु च निरामयाः।।
वयं भारताः सर्वजनेभ्यो, वितरामो नवशुभाशया।।
सरसजीवनं भवतु सर्वदा, नव उल्लासो जने जने।।
भवतु मंगलं नववर्षेऽस्मिन्, नवसंरचना वने वने।।

रा.उ.मा.वि., आगूँचा ( भीलवाड़ा )

# मम कुटुम्बनियोजनं करोतु.. ( स्मृतिकथा )

❑ डॉ. हर्षदेवमाधवः

यदाऽहं दशम्यां कक्षायामासम्, तदा मातुः स्थानान्तरं जातम्। वयं कोलियाकग्रामं गताः। कोलियाकग्रामः नदीतटे वर्तमानो रमणीयग्रामः आसीत्। ग्रामं परितः आम्र-निम्ब-तिंतिडी-बकुल-इत्यादयो वृक्षाः, प्राथमिकशालाया मनोहरः परिसरः शालां परितः वटवृक्षाः, समीप एव ग्रामकूपः। प्राथमिकशालायां मम माता अध्यापनकार्यम् अकरोत्। तेषु दिवसेषु ग्रामाणां शालाः भावनगरमण्डलविकासकार्यालयः अचालयत्। मण्डलविकासकार्यालयः भावनगरे आसीत्। शालानां शिक्षकाणां वेतनव्यवस्थां मध्यस्थकार्यालयः अकरोत्। प्रतिमासं आचार्यः सर्वेषां वेतनस्य रूप्यकाणि आनेतुं भावनगरम् अगच्छत्। कोलियाकग्रामतः एकं बसयानं प्रातःकाले भावनगरम् अगच्छत्। सायंकाले तदेव बसयानं कोलियाकं प्रत्यागच्छत्। अतः प्रथमायां तारिखायां प्रातःकाले प्राचार्यः सहायकाध्यापकेन सह भावनगरं गच्छति स्म, सायंकाले वस्त्रस्यूते सर्वेषाम् अध्यापकानां वेतनम् आनयत्। मण्डलकार्यालयः शिक्षकेषु उपकारं करोतीव वेतनव्यवस्थाम् अकरोत्। अपि च सर्वकारस्य ये ये आदेशाः आसन् तान् सफलीकर्तुं मण्डलाधिकारी आदेशान् अकरोत्।

रविशङ्करः कोलियाकग्रामस्य प्राचार्यः आसीत्। गान्धिटोपीधारकः षट्फुटमितः उच्चः खादीवस्त्रधारकः रविशङ्करः अतीव दृढपुरुषः आसीत्।। स वाग्मी, सत्यवादी, पवित्रहृदयः सदैव छात्राणां साहाय्यं कर्तुम् उद्यतः। वामस्कन्धे उपवीतधारकः परशुरामवंशज इव उग्रः रविशङ्करः प्रतिमासम् अध्यापकानां वेतनम् आनेतुं गच्छति स्म।

तेषु दिवसेषु भारते गुर्जरे च कॉङ्ग्रेसशासनम् आसीत्। कुटुम्बनियोजनकार्यक्रमाः पराकाष्ठायां प्राचलन्। सर्वकाराधिकारिणः ग्रामजनान् कुटुम्बनियोजनं कारयितुं प्रेरयन्ति स्म। सर्वकारेण प्रतिमण्डलं यल्लक्ष्यं निर्धारितमासीत् तत् सिद्धं कर्तुम् अधिकारिणः स्वसहयोगिनः प्रेरयन्ति, तर्जयन्ति स्म। रविशङ्करः व्यग्रः आसीत्। मण्डलाधीशाः तं कुटुम्बनियोजनं कारयितुं ग्रामजनानां नामानि एकत्रीकर्तुम् अतर्जयन्। एकस्मिन् मासे मण्डलविकासाधिकारी रविशङ्कराय न्यवेदयत्, 'आगामिनि मासे कमपि ग्रामीणजनं कुटुम्बनियोजनं कारयितुम् आनय। अन्यथा तव शालायाः वेतनव्यवस्था न भविष्यतीति।' व्यग्रवदनः रविशङ्करः सायंकाले विलम्बेन आगतवान्। सः सर्ववृत्तान्तं शिक्षकेभ्यः निवेद्य ग्रामजनान् कुटुम्बनियोजनार्थं प्रेरयितुं प्रार्थनामकरोत्। पुनरपि एकः मासः व्यतीतः। वराकाणां शिक्षकानां वेतनमानेतुं रविशङ्करः तर्जनाभयविह्वलः मण्डल-कार्यालयम् अगच्छत्। मण्डलविकासाधिकारी शिक्षणाधिकारी च तस्य प्रतीक्षामकुरुताम्। यदा स कार्यालयं प्राविशत् तदैव अधिकारिमहोदयः अपृच्छत्, 'किं कस्यापि ग्रामजनस्य नाम आनीतं भवता ? कुटुम्बनियोजनशस्त्रक्रियां कारयितुं कोऽपि सज्जः अस्ति वा?' रविशङ्करः नम्रीभूय स्थितः। अधिकारिमहोदयः सरोषम् अब्रवीत्, 'यूयं शिक्षकाः सर्वकारस्य वेतनं मुधा प्राप्नुथ। सर्वेऽपि कर्मचोराः अलसाः। एकं ग्रामजनमपि न आनयसि? प्रतिमासं वेतनं स्वीकर्तुं धावसि।' इति।

रविशङ्करः अधुना क्षुभितः अभवत्। स तत्रैव भुवि सुप्तः। स आक्रोशत्, 'महोदयाः ! अहमत्रैव सुप्तः। भवन्तः चिकित्सकमाह्वयन्तु मम कुटुम्बनियोजनशस्त्र-क्रियां कारयन्तु। अहं तु अकिञ्चनः दीनः शिक्षकः। भवद्भिः सर्वकारस्य संकल्पानां पूर्तिः कर्त्तव्या। भवन्तोऽपि सर्वकारस्य सेवकाः मया सार्धं भवन्तोऽपि

शस्त्रक्रियां कारयन्तु। सर्वकारस्य शासनं नः पारितोषिकं दास्यति। मा विलम्बं कुर्वन्तु।' इति।

रविशङ्करस्य भाषणं श्रुत्वा अन्येऽपि अधिकारिणः तत्र अधावन्। किन्तु रविशङ्करः भूमिं नात्यजत्। अधिकारिणः विलक्षाः जाताः। रविशङ्करः पुनरपि अवदत्, 'मान्याः ! शिक्षकेभ्यः वेतनं दत्त्वा न उपकुर्वन्ति भवन्तः। निरक्षराणां वसतिषु शिक्षकाः रात्रावपि प्रौढशालां चालयन्ति। अस्माकं शिक्षकाः महिलाभ्योऽपि विना मूल्यम् शालां चलयन्ति। सर्वकारस्य लक्ष्याङ्कं किमस्माभिरेव सिद्धं कर्तव्यम् ? किं सर्वकार्यक्रमाणां दायित्वम् अस्माकमेव वर्तते? भवन्तः कार्यालयं त्यक्त्वा कस्मात् ग्रामं न गच्छथ?' इति।

रविशङ्करस्य रौद्रस्वरूपं वीक्ष्य सर्वे हतप्रभा जाताः। एकोऽधिकारी जलम् आनयत्। सर्वे मिलित्वा रविशङ्करं शान्तं, स्वस्थम् अकुर्वन्। ततः पश्चात् न कोऽपि अधिकारी तमतर्जयत्। यदा चन्दनमतीव घृष्यते तदा चन्दनादपि अग्निर्जायते इति सत्यम्। शमप्रधानेषु मानवेषु सुप्ता वह्निज्वाला कदापि प्रज्वलति। अधुनापि अहं शान्तं, स्वस्थं प्रसन्नवदनं तथापि दृढमनोबलं रविशङ्करं स्मरामि। शिक्षकः कदापि न साधारणमनुष्यः। तस्मिन्नपि संवर्तकाग्निज्वाला निगूढा वर्तते।

**8, राजतिलक बंग्लोज, आबादनगरम्,**
**बस स्टोप समीपे, पेट्रोलपम्प निकटे,**
**बोपल, अमदाबाद-380058**

# वृद्धा जनाः शिक्षकाः

❑ **आचार्य डॉ. राजेशकुमारगुप्तः**

वार्धक्ये नरजीवनं शिथिलतां दौर्बल्यमाप्नोति च
गात्राणामपक्षीयते खलु बलं कम्पोऽधिकं जायते।
सौन्दर्यं मुखमण्डलस्य मलिनं चित्ते न शान्तिः परा,
व्याधीनां सदनं शरीरमखिलं वृद्धस्य बुद्धौ भ्रमः।। 1।।

कर्णाभ्यां बधिरः शृणोति वचनं निन्दाकरं न स्तुतिं,
सङ्गीतं मधुरं हितं न भुवने काव्यं न वृद्धो जनः।
सामर्थ्यं न निरीक्षितुं नयनयोर्मार्गं शुभं सुन्दरं,
चाले नैव गती रतिर्न सुखदा तस्याऽति दुःखं महत्।।2।।

वृद्धा ज्ञानसमन्विता धृतिधराः संस्कारसिद्धाः सदा,
सम्मान्या धनधान्यज्ञानशमदा विद्याधना उत्तमाः।
शुद्धा ये हृदयेन भक्तिसुधया भक्ता अनन्या हरेः,
मन्त्रोच्चारणपूर्वकं सुविधिना कुर्वन्ति ते पूजनम्।। 3।।

पीतो यैर्मधुरो रसश्च कटुकः सौख्यस्य दुःखस्य च,
कृत्वा कर्म सुकर्म चैव विविधं ज्ञातं रहस्यं परम्।
लोकाचारविशिष्टतां सुजनतां लोके जनान् शिक्षितुं,
चारित्र्यं भवनीतिज्ञानमतुलं वृद्धाः समर्थाः सदा।। 4।।

सेवन्ते भुवि ये जना मलधियो लाभाय युष्मान् यदा,
आयुर्ज्ञानयशोबलानि सफलं लब्ध्वा तदा हर्षिताः।
वृद्धाः शान्तधियो भवन्ति विषमे काले विषण्णाः कथं?
नैराश्येन विषण्णता न भवतान्न्यूनो न मोदस्तथा।। 5।।

आचाराद् युवकेषु जीवनदिशां निर्दिश्य नीतिं तथा,
आदर्शाः पथदर्शकाः सुमतिदा भ्रष्टे समाजेऽधुना।
संन्यासाद् भवतां विरक्तमनसां मानः सदा वर्धतां,
मोदन्तां सुखदायिनो युगधरा वृद्धा जनाः शिक्षकाः।।6।।

**संस्कृत-विभागः, केन्द्रीय विद्यालय क्र. 2,**
**सैन्यस्थलम्, जयपुरम्**

नारी-स्तम्भः

# राज्ये महिला मण्डिता

❑ डॉ. राजेश्वरी भट्टः



8 मार्च दिनं 2016 तमेवर्षे राजस्थानप्रदेशस्य मुख्यमन्त्री वसुन्धराराजे राजस्थानविधानसभायां राज्यस्य तृतीयं आयव्ययकं (बजट) प्रस्तुतवती। होरात्रयपर्यन्तं सततं प्रवर्तमानेऽस्मिन् भाषणे मुख्यमन्त्रिणा विभिन्नविभागानां वर्गाणां क्षेत्राणाञ्च सुविकासाय तत्तत्क्षेत्राधिकारिभिः विषय-विशेषज्ञैश्च सह चिन्तनं मननं मंथनञ्च कृत्वा नवनवीनानां-कार्यक्रमाणां विकासपरकयोजनानाञ्च उद्घोषणा कृता। यद्यपि नवीनेऽस्मिन् तृतीये आयव्ययके सार्थकशिक्षा, उन्नतकृषिः विद्युद्वितरणं, पेयजलापूर्तिः, स्वास्थ्य-संरक्षणं, पर्यटनस्थलानांसौन्दर्यकरणं, गृहोद्योगसंवर्द्धनं, गोवंशरक्षणं, वनरक्षणं, धार्मिकस्थलानां सुरक्षा एवमेव प्रायः सर्वेषां विभागानां कृते अनिवार्याणाम्, अपेक्षाणां समाधानं वर्तते। तथापि 'विश्वमहिलादिवसे' मुख्यमंत्रिणा प्रस्तुतं तृतीयं आयव्ययकं महिलाभिः सुरंगीमणिमाला इव अभिनन्दितम्। प्रस्तुतेऽस्मिन् आयव्ययके महिलानां कृते जन्मग्रहणादारभ्य वृद्धावस्थापर्यन्तं नैकासां कल्याणकारियोजनानां व्यवस्था विहिता। अध्ययनकाले राजकीय विद्यालयेषु अध्ययने संलग्नानां बालिकानां कृते सम्पूर्ण शिक्षायै 50000/- रुप्यकाणां व्यवस्था विहिता। एवमेव राजकीयचिकित्सालयेष्वपि बालिकानां कृते निःशुल्क-चिकित्सा उपलब्धा भविष्यति। आयव्ययकानुसारेण आगामिषु त्रिवर्षेषु लक्षत्रयबालिका आत्मरक्षा-प्रशिक्षणेन प्रशिक्षिताः भविष्यन्ति एतदर्थं 'टोंक' इति उपनगरे बालिकानां कृते पञ्चानां छात्रावासानां निर्माणं निश्चितं वर्तते। प्रस्तुते आयव्ययके छात्राणां कृते 'स्कूटी' इति यानस्य विशिष्टा वितरणव्यवस्था शुल्कं विना विहिता। राज्ये विवाहसमारोहेषु जातस्य धनस्यापव्ययं वारयितुमत्र सामूहिकविवाहसमारोहाणां समर्थनं कृतम्। सामूहिकविवाहेषु वधूनां कृते सर्वकारेण 15000/- रुप्यकाणां राशिः उपहारस्वरूपेण प्रदेयो भविष्यति। एवमेव वैधव्याभिशापेन व्यथितानां महिलानां पुनर्विवाहाय सर्वकारेण 30000/- रूप्यकाणां राशिः उपहारीकृत्य तासां कृते विकासस्य मंगलमयानि द्वाराण्युद्घटितानि। व्यवसायोन्मुखीनां महिलानां उत्साहवर्द्धनाय अस्मिन् आयव्ययके, मुक्तहस्तेन सहायतायाः प्रावधानं वर्तते 'आंगनबाड़ी' इति पोषाहार-कार्यक्रमे संलग्नानां महिलापदाधिकारिणां, सदस्यानां, सेविकानाञ्च कृते तासां पदानुसारेण आर्थिकलाभस्य घोषणा कृता। राज्ये महिलासशक्तीकरणाय, आयव्ययके 30000/- 'महिला स्वयंसहायतासमूहानां' घटनं भविष्यति अनेन लक्षचतुष्टयपरिमिता महिला लाभान्विता

भविष्यन्ति। निर्धनपरिवाराणां (B.P.L.) महिलानां कृतेऽप्यत्र आर्थिकलाभस्य उद्घोषणा कृता। स्पष्टमस्ति यत् राज्यस्य सर्वतोमुखविकासाय प्रस्तुतमपि नवीनं आयव्ययकं महिलानां कृते मङ्गलकरं वर्तते।

## हिन्दी अनुवाद

8 मार्च 2016 ई. को राजस्थानप्रदेश की मुख्यमन्त्री 'वसुन्धराराजे' ने राजस्थान-विधानसभा में राज्य का तृतीय 'बजट' प्रस्तुत किया। तीन घंटे तक धुआँधार गति से चलने वाले इस भाषण में मुख्य मंत्री के द्वारा विभिन्न क्षेत्रों, विभागों एव वर्गों के समुचित विकास के लिए सम्बन्धित अधिकारियों एवं विषय विशेषज्ञों के साथ चिन्तन मनन एवं मंथन कर नये-नय कार्यक्रमों एवं विकासमूलक योजनाओं की घोषणा की गई। यद्यपि इस नवीन बजट में सार्थक शिक्षा, उन्नत कृषि, विद्युत् व्यवस्था, पेयजलापूर्ति स्वास्थ्यसंरक्षण पर्यटनस्थलों का सौन्दर्यीकरण, गृहउद्योगों का संवर्द्धन चिकित्सा सुविधा, पर्यावरण संरक्षण, गोवंश संरक्षण, वन संरक्षण, धार्मिक स्थलों का समाधान किया गया है, तथापि 'विश्व महिला दिवस' पर मुख्य मंत्री द्वारा प्रस्तुत यह बजट महिलाओं के लिए रंग-बिरंगी मणिमाला की भाँति अभिनन्दनीय है। इस नये तृतीय बजट में महिलाओं के लिए जन्म प्राप्ति से वृद्धावस्था तक के लिए अनेक कल्याणकारी योजनाओं की व्यवस्था है। राजकीय विद्यालयों में अध्ययनरत बालिकाओं के लिए सम्पूर्ण शिक्षा प्राप्ति पर्यन्त 50000 हजार रुपयों की व्यवस्था की गई हैं। इसी प्रकार राजकीय चिकित्सा का प्रावधान किया गया हैं। इसी प्रकार राजकीय चिकित्सालयों में भी बालिकाओं के लिए नि:शुल्क चिकित्सा का प्रावधान किया गया है। नवीन बजट के अनुसार आगामी, तीन वर्षों में तीन लाख बालिकाएँ 'आत्मरक्षा' का प्रशिक्षण प्राप्त कर प्रशिक्षित होंगी। इस कार्य के लिए टोंक उप नगर में पाँच छात्रावासों का निर्माण निर्धारित है। छात्राओं के लिए 'स्कूटी' वाहन की नि:शुल्क वितरण व्यवस्था का प्रावधान नवीन बजट में सम्मिलित है।

विवाह समारोहों में धन का अपव्यय रोकने के लिए सामूहिक विवाह पद्धति का समर्थन मुक्त कंठ से किया गया है तथा सामूहिक विवाह में वधू को सरकार की ओर से 10000/- रु. की राशि उपहार स्वरूप स्वीकृत की गई है। वैधव्य अभिशाप से व्यथित महिलाओं के पुनर्विवाह के लिए सरकार ने बजट में 30000/- तीस हजार रुपये उपहार रूप में स्वीकृत कर महिला कल्याण का मार्ग प्रशस्त किया गया है। व्यवसाय करने की इच्छुक महिलाओं के लिए मुख्य मन्त्री मुक्त हस्त से सहायता के लिए तत्पर है। आँगनबाड़ी कार्यक्रम में संलग्न महिला पदाधिकारिणी, सदस्या तथा सेविकाओं को पद के अनुसार आर्थिक लाभ प्रदन करने की घोषणा की गई है। उदार दृष्टि से बनाए गये तृतीय आयव्ययक (बजट) में 30000/- हजार महिला स्वयं सहायता समूह का गठन किया जाएगा जिससे चार लाख महिलाएँ लाभान्वित होंगी। नये बजट में निर्धन परिवार (B.P.L.) की महिलाओं के लिए भी आर्थिक लाभ की योजना की गई है। सम्पूर्ण दृष्टि से चिन्तन करने पर यह बजट राज्य के सर्वतोमुखी विकास के लिए लाभप्रद होने पर भी महिलाओं के लिए उपहारों की सौगात है।

आयुर्वेद-स्तम्भः

# त्यजेदध्यशनं सदा

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**वर्तमानकाले विशिष्टमेकं पदं प्रचलितं वर्तते 'लाइफस्टाइल' इति। बहुविधानां रोगाणामुत्पत्तौ 'लाइफस्टाइल' इत्यस्य योगदानं वर्तते। भारतीय-संस्कृतौ परम्परातः आयुर्वेदीय 'चर्या' इत्यात्मकस्य व्यवस्थित-स्वरूपस्य प्रचलनं वर्तते। यत्र हि दिनचर्या, रात्रिचर्या तथा ऋतुचर्येति चर्यात्रयस्य परिपालनं कुर्वन्ति जनाः पारम्परिकरूपेण। आयुर्वेदीये साहित्ये चर्यात्रयस्य आचाररसायनस्य सद्वृत्तापरपर्यायस्य च विस्तृरूपेणोल्लेखो वर्तते, येषां परिपालनार्थमाचार्यः निर्दिशति यद् आयुष्कामयमानेन जनेन धर्मार्थसुख-साधनात्मकस्यायुर्वेदस्य ये निर्देशोपदेशाः सन्ति तेषु परमादरो विधेयः। आचार्यः वाग्भटः निर्दिशति यत् प्रतिदिनं क्रियमाणानां कर्मणां सर्वदा स्मृतिपूर्वकं व्यवस्थित-रूपेण यः सम्पादनं करोति सः कदापि दुःखभाङ् न भवति। यथा हि-**

**नक्तं दिनानि मे यान्ति कथम्भूतस्य सम्प्रति।
दुःखभाङ्न भवत्येवं नित्यं सन्निहितस्मृतिः।।**

**( अ.हृ.सू. 2/47 )**

वर्तमानकाल में एक विशिष्ट पद प्रचलित है- 'लाइफ-स्टाइल'। अनेक प्रकार के रोगों की उत्पत्ति में 'लाइफ-स्टाइल' का योगदान है। भारतीय-संस्कृति में परम्परा से आयुर्वेदीय 'चर्या' इस व्यवस्थित स्वरूप का प्रचलन है। जिसमें कि दिनचर्या, रात्रिचर्या तथा ऋतुचर्या इन तीन चर्याओं का लोग पारम्परिक रूप से परिपालन करते हैं। आयुर्वेदीय साहित्य में इन तीन चर्याओं का 'सद्वृत्त' इस पर्याय वाले आचाररसायन का विस्तृत रूप से उल्लेख है, जिनके परिपालन के लिए आचार्य निर्देश देते हैं कि दीर्घ आयु की कामना करनेवाले व्यक्ति को धर्म, अर्थ के सुखस्वरूपक साधन वाले आयुर्वेद के जो निर्देश और उपदेश हैं उनमें पर्याप्त आदर रखना चाहिए। आचार्य वाग्भट कहते है कि प्रतिदिन किए जाने वाले कर्मों को सर्वदा स्मृतिपूर्वक व्यस्थित रूप से जो सम्पन्न करता है वह कभी भी दुःख का भागी नहीं होता है। जैसे कि-

किस प्रकार का जीवन व्यतीत करते हुए मेरे दिन और रात अब कैसे व्यतीत हो रहे हैं, इस की सदा स्मृति बनाए रखने वाले को कभी दुःख नहीं होता। वह दुःख का भागी नहीं होता।

**नक्तं दिनानि तु सर्वेषां यान्ति किन्तु कथं यान्तीति तु केचन एव विचारयन्ति। प्रचलितस्य 'लाइफ स्टाइल' इत्यस्य विकृतेन स्वरूपेणैवाधिसंख्य-जनानां नक्तं-दिनानि यान्तीति जानन्ति स्वास्थ्यक्षेत्रे सम्पृक्ताः रोगाणामुत्पत्तौ प्रशमने च प्रयासरताः जागरूकजनाः। आयुर्वेदे 'ब्राह्मे मुहूर्त उत्तिष्ठेत् स्वस्थो रक्षार्थमायुषः' एषः प्राथमिकः निर्देशः वर्तते दिन-चर्या-परिपालन-क्रमे। चर्यैव 'लाइफ स्टाइल' वर्तते। अतः यः ब्राह्मे मुहूर्त उत्तिष्ठति सः सर्वं दिनं व्यवस्थितरूपेण सर्वाण्यावश्यकानि कर्माणि कुर्वन् दिनस्य यापनं करोति, सः सर्वदाऽऽरोग्येण सम्पृक्तो भवति, यश्च विलम्बेनोत्तिष्ठति तस्य चर्या विकृतरूपेण परिपालिता विकृतिं ददाति। संक्षिप्तरूपेण 'लाइफ स्टाइल' इत्यात्मिकां दिनचर्यामभिलक्ष्याचार्यः निर्दिशति यत्-**

**नित्यं हिताहारविहारसेवी समीक्ष्यकारी विषयेष्वसक्तः।
दाता समः सत्यपरः क्षमावानाप्तोपसेवी च भवत्यरोगः।।**

(अ.हृ.सू. 4/36)

दिन-रात तो सभी के व्यतीत होते हैं किन्तु कैसे जाते हैं ऐसा विचार तो कुछ लोग ही करते हैं। प्रचलित 'लाइफ

स्टाइल' इस के विकृत स्वरूप से अधिकांश लोगों के दिन-रात व्यतीत होते हैं, यह स्वास्थ्य-क्षेत्र से जुड़े हुए तथा रोगों की उत्पत्ति और प्रशमन में जागरूक लोग जानते हैं। आयुर्वेद में 'स्वस्थ व्यक्ति आयु की रक्षा के लिए ब्राह्म मुहूर्त में उठे' यह प्राथमिक निर्देश दिनचर्या के परिपालनक्रम में है। चर्या ही 'लाइफ स्टाइल' है। अतः जो ब्राह्म मुहूर्त में उठता है वह सम्पूर्ण दिन व्यवस्थित रूप से सभी आवश्यक कार्यों को करता हुआ दिन को व्यतीत करता है। वह सदा आरोग्य के साथ जुड़ा रहता है, जो देर से उठता है उसकी विकृत रूप से की जाती हुई दिनचर्या विकृति देती है। संक्षिप्तरूप से 'लाइफ स्टाइल' इस प्रकार की दिनचर्या को ध्यान में रखकर आचार्य कहते हैं कि -

सदा हितकारक आहार और हितकारक विहार का सेवन करने वाला व्यक्ति, सोच-विचार कर कर्तव्य करने वाला विषयों (राग-द्वेषादि) में आसक्त न रहने वाला, दाता, सब प्राणियों से समबुद्धि रखने वाला, सत्यनिष्ठा वाला, क्षमाशील तथा आप्त पुरुषों का सेवन करने वाला मनुष्य निरोगी होता है।

**संक्षिप्तेन निर्दिष्टेऽस्मिन् सूत्रे स्पष्टरूपेण संकेतितः यद् आहार-विहारात्मकानां सर्वेषामावश्यकानां सम्पादनीयानां कर्मणां तथा सद्वृत्तस्य परिपालनं रोगानुत्पादनक्रम आवश्यकः वर्तते। क्रमेऽस्मिन् स्तम्भत्रयस्य व्यवस्थितरूपेण परिपालनस्यावश्यकतां निर्दिशन्त्याचार्याः। स्तम्भत्रयं तु 'आहारः स्वप्नो ब्रह्मचर्यम्' इति प्रकारत्रये समाहितम्। अत्रैव त्रिष्वेव सद्वृत्तस्य आचाररसायनात्मकस्य समावेशोऽपि भवत्येव। वर्तमानकालीने 'लाइफस्टाइल' इत्यात्मके क्रमे त्रयाणामेतेषां विकृतरूपेण परिपालनं भवति, तेन हि मधुमेहो हृद्रोगः श्वास-कासरोगोऽवसादोऽन्ये च ईर्ष्या-भय-क्रोध-लोभ-मोहादिभ्यः जायमानाः मानसिकाः रोगास्तथा शिरःशूलं ग्रीवास्तम्भः नेत्रविकाराश्च कम्प्यूटर प्रयोगेण जायमानाः विकाराः प्रमुखरूपेण सन्ति।**

संक्षिप्त रूप से निर्दिष्ट इस सूत्र में स्पष्ट रूप से संकेत दिया गया है कि आहार-विहारस्वरूपक सभी आवश्यक सम्पन्न किए जाने योग्य कर्मों का तथा सद्वृत्त का परिपालन रोगों के अनुत्पादन क्रम में आवश्यक है। इस क्रम में स्तम्भत्रय के व्यवस्थित रूप से परिपालन की आवश्यकता को आचार्य निर्दिष्ट करते हैं। स्तम्भत्रय तो 'आहार, स्वप्न और ब्रह्मचर्य' इन तीन भेदों में समाहित है। यहीं पर तीनों में ही आचार रसायनस्वरूपक सद्वृक्ष का समावेश भी होता है। वर्तमानकालीन 'लाइफस्टाइल' स्वरूपक क्रम में इन तीनों की परिपालना विकृतरूप में होती है, उससे मधुमेह, हृदयरोग, श्वास-कास रोग, अवसाद तथा अन्य ईर्ष्या, भय, क्रोध, क्षोभ, मोहादि से उत्पन्न होने वाले मानसिक रोग तथा शिरः शूल, ग्रीवास्तम्भ (गर्दन की जकड़ाहट) आँखों के रोग जो कि कम्प्यूटर के प्रयोग से होने वाले हैं, ये विकार प्रमुख हैं।

**अत्र गम्भीरावलोकनं यदि वयं कुर्मस्तदा पश्यामः यत् 'लाइफस्टाइल' इति तु नामैव विशेषेण निर्धारितमन्यथा तु विकृते 'लाइफस्टाइल' इत्यत्र तु नित्यमहिताहारविहारसेव्यसमीक्ष्यकारी विषयेषु सक्त इत्यादयः वैकारिका एव भावाः सन्ति य एवं सन्दूषयन्ति। इत्थं करणेन समुत्पन्नेषु रोगेष्वाधुनि-काश्चिकित्सकाः कथयन्ति यत् 'लाइफस्टाइल' इतितु सम्यक्रूपेण विधातव्यमेभिः पीडितैर्जनैः। एषः निर्देशस्तु संहिताकारैः पूर्वत एव दीयतेस्म विकृत्यात्मकेऽस्मिन् क्रमे प्राथमिकरूपेण स्तम्भत्रयस्यैव विकृतिरवलोक्यते। तत्रापि च प्राथमिकरूपेणाहारः विचारणीयो वर्तते। यद्यप्याहारेऽपि बहुविधानां निर्देशानां संस्थितिर्वर्तते यथा हि सुश्रुतोक्ताः द्वादशाशनप्रविकाराः चरकोक्तानि चाष्टावाहारविधिविशेषायतनानन्यान्यपि च करणीयानि कर्माणि पालनीयाश्च नियमाः वर्तन्ते।**

यहाँ हम यदि गम्भीररूप से अवलोकन करें तो देखते हैं कि 'लाइफस्टाइल' यह तो नाम ही विशेषरूप से निर्धारित है अन्यथा तो विकृतस्वरूपक इस लाइफस्टाइल में तो नित्य ही अहिताहार, अहित विहार का सेवन करने वाला, विना सोचे विचारे काम करने वाला, विषयोपभोग में लगा हुआ इत्यादि वैकारिक भाव ही है जो इस को दूषित करते हैं। ऐसा करने से उत्पन्न रोगों में आधुनिक चिकित्सक कहते हैं कि इन रोगों से पीडित व्यक्तियों को 'लाइफ स्टाइल' को सम्यक्रूप में व्यवस्थित करके सम्पन्न करना चाहिए। यह निर्देश तो संहिताकारों ने पहले ही दे दिया था। विकृतिस्वरूपक इस 'लाइफ स्टाइल' के प्रयोग के क्रम में प्राथमिक रूप से स्तम्भत्रय (आहार, स्वप्न, ब्रह्मचर्य) की विकृति ही देखी जाती है। उनमें भी प्राथमिकरूप से आहार ही विचारणीय है। यद्यपि आहार में भी इनेक प्रकार के निर्देशों की स्थिति है, जैसे कि सुश्रुतोक्त द्वादशाशन प्रतिविचार और चरक के आठ आहार विधि विशेषायतन तथा और भी करणीय कर्म तथा पालनीय नियम है।

**तेषां नियमानामन्येषाञ्च विचाराणां प्रविचाराणा-मायतनानाञ्च विश्लेषणस्य विवेचनस्य चावश्यकता वर्तते, तत्तु विवेचनं पृथक् रूपेण करणीयं वर्तते, अत्र तु प्राथमिकरूपेणाध्य-शनस्यैव संक्षिप्तरूपेण विवेचनं प्रस्तूयते। किञ्चित्समयपूर्वमेव (विंशति वर्षाणां पूर्वमेव) जनाः स्वभावतोऽध्यशनं न कुर्वन्तिस्म। यत्र कुत्रापि गच्छन्ति स्म तत्र शार्करं चायपानमेव प्राधान्येन प्रचलन आसीत्। पञ्चाशत् वर्षाणां पूर्वं तु केवलस्य जलस्याथवा सगुडस्य तर्पणात्मकस्य जलस्यैव प्रचलनमासीत्। अधुना तु यत्र कुत्रापि कोऽपि गच्छेत् चायपानेन यह मिष्टान्नस्य नमकीन नामकस्य सलवणस्य कटुरसप्रधानस्य व्यञ्जनस्य सेवनमपेक्षितं वर्तते। यदि मिष्टान्नस्य व्यवस्था न भवेत्तदाऽपि बिस्किट पिष्टक नामकस्य शुष्कस्यान्नस्वरूपस्य पक्वान्न-स्वरूपस्य पदार्थस्य प्रस्तुतीकरणं विधीयते चायनामकेनोष्णेन पेयद्रवेण सह।**

उन नियमों का तथा अन्य विचारों का प्रविचारणाओं का तथा आयतनों के विश्लेषण और विवेचन की आवश्यकता है, वह विवेचन तो पृथक्रूप से करणीय है, यहाँ तो प्राथमिक रूप से अध्यशन का ही संक्षिप्त रूप से विवेचन प्रस्तुत किया जा रहा है। कुछ समय पहले ही (बीस वर्ष पहले) लोग स्वभावतः अध्यशन नहीं करते थे। जहाँ कहीं भी जाते थे वहाँ शर्बत या चायपान ही विशेषरूप से प्रचलन में था। पचास वर्ष पहले तो केवल जल का अथवा गुड मिले हुए तर्पणस्वरूपक जल का ही प्रचलन था। वर्तमान में तो जहाँ कहीं भी जाओ चायपान के साथ मिष्टान्न का तथा नमकीन नामक लवणसहित कटुरस प्रधान व्यञ्जन का सेवन अपेक्षित है। यदि मिष्टान्न की व्यवस्था न हो तो भी बिस्कूट (पिष्टक) नामक शुष्क अन्नस्वरूपक पक्वान्नस्वरूपक पदार्थ को चायनामक उष्ण पेय द्रव के साथ प्रस्तुत किया जाता है।

**आचार्यः चरकः निर्दिशति यत्- 'भुक्तं पूर्वान्नशेषे तु पुनरध्यशनं मतम्'। पूर्वमन्नं जाठरेणाग्निना नैव विपाचितम् ततः पूर्वमेवान्यदन्नं गृहीतमध्यशनपदेन प्रोच्यते। अन्यत्रापि प्रोक्तम्- 'भुक्तस्योपरि यद्भुक्तं तदध्यशनमुच्यते'। समानार्थ-मेवैतद्वचनम्। आचार्येण चरकेण त्रिविधस्य विकृत्यात्मकस्याहारस्य विवेचनं कृत्वा निष्कर्ष-रूपेण प्रोक्तं यदेतानि त्रिविधात्मका-न्यन्नान्यर्थादाहारस्वरूपेण गृहीतानि द्रव्याणि विविधान् रोगान् सृजन्त्यथवा मृत्युमपि ददति, यथा हि-**

**पथ्यापथ्यमिहैकत्र भुक्तं समशनं मतम्।**
**विषमं बहु वाऽल्पं वा ऽप्यप्राप्तातीत कालयोः।।**
**भुक्तं पूर्वान्नशेषे तु पुनरध्यशनं मतम्।**
**त्रीण्यप्येतानि मृत्युं वा घोरान् व्याधीन्सृजन्ति वा।।**

**व्युत्पत्तिदृशा अशने अशन मित्यध्यशनम्।**

आचार्य चरक कहते हैं कि पहले भोजन किए हुए का यदि पाचन न हो कर पूर्व अन्न शेष रहने पर खाया गया (युक्त) आहार अध्यशन कहलाता है। पूर्व अन्न जठराग्नि के द्वारा नहीं पचाया गया हो उससे ही पहले ही गृहीत किया गया अन्य अन्न अध्यशन पद से उच्चारित किया जाता है। अन्यत्र भी कहा गया है कि किए गए भोजन पर ही (पचने से पहले ही) किया गया भोजन अध्यशन कहलाता है। यह वचन ऊपर वाले वचन के समानार्थक है। आचार्य चरक ने त्रिविधात्मक आहार का विवेचन कर के निष्कर्ष रूप से कहा है कि जो ये त्रिविधात्मक अन्न अर्थात् आहारस्वरूप में गृहीत किए गए द्रव्य हैं वे अनेक प्रकार के रोगों को उत्पन्न करते हैं अथवा मृत्यु भी देते हैं, जैसे कि –

पथ्य और अपथ्य एकत्र खाया गया समशन कहलाता है, अधिक अथवा कम अथवा भोजन का समय प्राप्त नहीं हुआ हो उस से पहले ही या भोजन का समय निकल जाने पर जो भोजन किया जाता है उसे विषमाशन कहते है। पहले के किए हुए आहार के शेष रहने पर पुनः खाया गया अन्न (आहार) अध्यशन कहलाता है। ये तीनों ही या तो मृत्यु देते है या भयङ्कर व्याधियों को उत्पन्न करते हैं। व्युत्पत्ति की दृष्टि से 'अशने अशनम्' भोजन पर भोजन अध्यशन है।

**यत्र यत्र हि जना इतस्ततः कार्यालयेषु मित्राणां गृहेषु, सम्बन्धिनां गृहेष्वन्यत्र वोत्सवेषु विभिन्नेषु स्थलेषु वा जनैः सह परस्परं मिलन्ति तदा निश्चित-रूपेणादरसूचकं स्वल्पाहारं चायपानेन सह कुर्वन्त्येव। एतत्तु सामान्यतया भुक्तस्येपरि भुक्तमेव भवति। एतस्मिन्नध्यशनक्रमे पथ्यापथ्यस्य विचारः न कदापि भवति, बह्वन्नस्याल्पस्यान्नस्याप्राप्तातीत-कालयोश्च विचारस्यावकाश एव न विद्यते। अतएवाध्यशनं यदा भवति तदैवान्ययोः समशन-विषमाशनयोरपि प्रयोगः प्रधर्षाद्भवत्येव। एष प्रयोगः नवीनेऽस्मिन् व्यवहारे 'लाइफस्टाइल' स्वरूपस्य परिपालनक्रमे भवत्येव। अत एव विशेषेण मधुमेहस्य हृद्रोगस्य चाक्रमणं तु भवत्येतादृग्विधानां 'लाइफ-स्टाइल' इत्यात्मिकानां विकृतस्वरूपिणीनां चर्याणां सेवनेन। अत एवात्र पूर्णरूपेण त्रयाणां समशनादीनां तथा विकृत्या-त्मिकानां चर्याणामुपसेवनेऽध्यशनमेव मूलमतः अरोगतां यदि वाञ्छति कोऽपि तदा तु 'त्यजेदध्यशनं सदा'।**

जहाँ-जहाँ पर ही लोग इधर-उधर कार्यालयों में, मित्रों के घरों में या सम्बन्धियों के घरों में अथवा अन्यत्र उत्सवों में या अन्य विभिन्न स्थलों में परस्पर मिलते हैं तब निश्चित रूप से आदरसूचक स्वल्पाहार चायपान के साथ करते ही हैं। यह तो सामान्यतया भोजन किए हुए पर ही भोजन करना है। इस अध्यशनक्रम में पथ्यापथ्य का विचार कभी भी नहीं होता है, अधिक अन्न का या अल्प अन्न का अथवा अप्राप्त और अतीत काल में किए गए भोजन के विचार का तो अवकाश ही नहीं रहता है। इसलिए अध्यशन जब होता है तब अन्य दोनों समशन और विषमाशन का प्रयोग भी जबर्दस्ती हो ही जाता है। यह प्रयोग इस नवीन व्यावहार 'लाइफ स्टाइल' के परिपालनक्रम में होता ही है। इसलिए विशेषरूप से मधुमेह का और हृद्रोग का आक्रमण तो होता ही है, ऐसे ही लाइफस्टाइल नामक विकृतस्वरूप की इस चर्या के सेवन से। इसलिए यहाँ पूर्णरूप से समशन आदि तीनों ही विकृत्तिस्वरूपक चर्याओं के सेवन करने में अध्यशन ही मूल है अतः यदि कोई भी अरोगता (आरोग्य) चाहता है तो अध्यशन सदा के लिए ही छोड़ दे।

**८०, सेनापति हाउस के पीछे, प्रेमनगर,**
**झोटवाड़ा, जयपुर**

पठतु संस्कृतम् | राजस्थान–सर्वकारः | जानातु भारतम्

# निदेशालयः, संस्कृत–शिक्षा, राजस्थानम्, जयपुरम्

(द्वितीयतलम्, ब्लॉकसंख्या 06, शिक्षासंकुलः, जवाहरलालनेहरुमार्गः, जयपुरम्–302015)
☎ 0141-2704357-58

## चैत्र–बैशाव वि.सं. 2073 (शा.सं. 1938) अप्रैलमासः, 2016

| | | | | | |
|---|---|---|---|---|---|
| रविवासरः | – | 3 | 10 | 17 | 24 |
| सोमवासरः | – | 4 | 11 | 18 | 25 |
| मंगलवासरः | – | 5 | 12 | 19 | 26 |
| बुधवासरः | – | 6 | 13 | 20 | 27 |
| गुरुवासरः | – | 7 | 14 | 21 | 28 |
| शुक्रवासरः | 1 | 8 | 15 | 22 | 29 |
| शनिवासरः | 2 | 9 | 16 | 23 | 30 |

**कार्यदिवसाः 22 रविवासराः 04 अवकाशाः 04 उत्सवाः 04**

01 अप्रैल – विद्यालयसमयपरिवर्त्तनम् ( 1 अप्रैलतः 30 सितम्बरपर्यन्तम्)
7.50 वादनात् 2.10 वादनपर्यन्तम् (संस्थाप्रधानानां कृते)।
8.00 वादनात् 2.10 वादनपर्यन्तम् (शिक्षकाणां कृते)।
8.05 वादनात् 2.10 वादनपर्यन्तम् (छात्राणां कृते)।

08 अप्रैल – चेटीचण्ड (अवकाशः उत्सवश्च)।

11–25 अप्रैल – स्थानीयवार्षिकपरीक्षाणाम् आयोजनम्।

14 अप्रैल – डॉ. बी.आर. अम्बेडकरजयन्ती (अवकाशः उत्सवश्च)।

15 अप्रैल – रामनवमी (अवकाशः उत्सवश्च)।

15–30 अप्रैल – सन्दर्भव्यक्तीनां, प्रशिक्षणम्, (एस.एस.ए. द्वारा)

19 अप्रैल – महावीरजयन्ती, अहिंसादिवसः (अवकाशः उत्सवश्च)।

30 अप्रैल – वार्षिकपरीक्षाणां परिणामघोषणा।

---

## जयपुरसंभागः प्रशिक्षणप्रकोष्ठः

### प्रशिक्षितशिक्षकाणां संगोष्ठी

प्रशिक्षणप्रकोष्ठः, जयपुरसंभागः, जयपुरपक्षतः अद्यावधि–प्रशिक्षित शिक्षकाणां संगोष्ठी जयपुरस्थे श्री दादू आचार्य–संस्कृतमहाविद्यालये, मोती डूँगरी इत्यत्र 05 अप्रेल, 2016 दिनांके भविष्यति। अत्र जयपुरसंभागस्थेषु जनपदेषु प्रशिक्षणप्रकोष्ठेन प्रशिक्षिताः सर्वेऽपि शिक्षकाः भागं ग्रहीष्यन्ति।

इयं संगोष्ठी एकदिवसीया अस्ति। अस्याः मुख्योद्देश्यानि अधोलिखितानि सन्ति–

(क) प्राप्तप्रशिक्षणस्य विद्यालयेषु क्रियान्वितिः।

(ख) विभागीय–योजनानां सफलक्रियान्वितिः।

(ग) संस्कृतभाषायाः प्रचारः प्रसारश्च।

**(डॉ. कमल किशोर चोटिया)**
संभागीय संस्कृत शिक्षा अधिकारी
जयपुर संभाग जयपुर

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

**छत्त एक, लाभ अनेक**

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

# पाञ्चजन्य Organiser

**हमारी विशेषताएं**

- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई–पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online
through our **Websites: www.panchjanya.com, www.organiser.org**

**ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-**
विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... **$ 60**
**Reach millions of consumers through our weeklies**

## भारत प्रकाशन (दिल्ली) लि.

2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com
दूरभाष: 011-47642000 से 30 फैक्स: 011-47642015 E-mail: circ@pbdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,